१२. विशुद्धिमयूख: पत्र - ४१
सम्पूर्ण

1393

11"×5"

इतिविशुद्धिमयूखः पत्रसंख्या ४१

वि०म०
१

श्रीगणेशायनमः योलीलयासंतनुतेच विश्वन्तत्पालयत्यात्मनि विश्वरूपे लयन्नयत्यात्मवशस्वरूपः शिवन्तगोत्रासुरारि
भुमाम्भौ १ श्रुतीःस्मृतीर्वीक्ष्य पुराणजातन्तन्निबंधानपि सन्निबंधान् श्रीशंकरसाल्लजनीलकण्ठ इमांस्तुशुद्धिंविरच्य
निसर्वाम् २ भ्रतारकैराहृतमत्रकिंचिन्मयानुतिर्मूलतयानतूज्झितम् ३ नाम्नानागोनुहितेनकाविनवपुण्यहीनापवि
निर्णीयते ३ अथद्रव्यशुद्धिः आदित्यपुराणे सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानिच कांस्यायस्ताम्ररैत्यानित्रपु
सीसमयानिच निर्लेपानिचशुध्यन्तिकेवलेनजलेनच शूद्रोच्छिष्टानिशौध्यानित्रिधाक्षाराम्लवारिभिरिति शंखः
शूद्रशकुनिमुखावमृष्टंनिर्लिखेत् श्वापदमुखावमृष्टंपात्रंनप्रयुञ्जीतेति निर्लेखलक्षणम् आपस्तम्बः गवा
घ्रातानिकांस्यानिशूद्रोच्छिष्टानियानिच शुध्यन्तिदशभिःक्षारैःश्वकाकोपहतानिच क्षारोभस्म एतच्चसलेप
हतिविषयम् आदिपुराणेसुरान्तरे भस्मनाशुध्यतेकांस्यंसुरयायन्नलिप्यते सुरामूत्रपुरीषैस्तुशुध्यतेतापनलेख
नैः आमिषेणतुयत्किंचित्पुनर्दाहेनशुध्यति बौधायनः तैजसानांमूत्राद्युपघातेपुनःकरणंगोमूत्रेवासप्तरा
त्रंपरिवासनम् पुनःकरणाशक्तौगोमूत्रेवासनम् अंगिराः गण्डूषंपादशौचंचयःकुर्यात्कांस्यभोजने षण्मा

संमुविविक्षिप्य पुनराकारमादिशेत पुनराकारः पुनःकरणम् मृज्जाणां नामलोपहतो पुनः पाकान्महीमयमिति याज्ञ
वल्क्येन शुद्धिरुक्ता तथा लोहानां हननाच्छुद्धिर्भस्मना गोमयेन वा हननात्खननाद्यपि शैलानामश्ममापि वा काष्ठाना
न्तक्षणाच्छुद्धिर्मृण्मयजलेरपि यदि तेन शुध्येत्तदा तावन्मात्रच्छेदनं दाहो वा स्वल्पान्तरे वस्त्रधान्यादिराशीनामेक
देशस्य दूषणे तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हतीति अन्यसमुद्धृतं तत्प्रोक्षणाच्छुध्यतीति भावः याज्ञवल्क्यः
शौचेरुदकगोमूत्रैः शुध्यत्याविककौशिकम् सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा सगौरसर्षपैः क्षौममिति अ
र्णामयमाविकम् कोशसंभवं टसरीपट्टादि कौशिकम् वल्कलतन्तुनिर्मितमंशुपट्टम् श्रीफलं बिल्वफलम्
पार्वतीयच्छागलोमनिर्मितं कुतपः अरिष्टं फेनिलफलम् अतसीसूत्रनिर्मितं क्षौमम् एतच्चाधिकोपघाते वि
विडुपघाते तु प्रोक्षणमेव शालग्रामतुलसिकादिविषये मिताक्षरायां विशेषः तुलिकाद्युपधानं च पुष्परक्ताम्ब
रं तथा शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि अतिमालिन्ये पु
रिशोधयेदपि अहतानां प्रोक्षणमिति स्मरणात् यंत्रमन्त्रनूतनवाससां प्रोक्षणाच्छुद्धिः शुष्कवाससः स्थलेक

पत्रपर्णानामन्नं जपमितस्यापवादः शुद्धिविवेके सम्भवाताऽनंतरमुक्तवत्मतिपात्स्येदिति शंखः सूतिकोच्छिष्टभाण्डं
स्पृष्टानामपहतस्य च त्रिसप्तमार्जनाच्छुद्धिर्नतु कांस्यस्य तापनम् कांस्यातिरिक्ततैजसानां मलापघाते मार्जनं तापनं च अतिमार्जन
मुदकक्षालनमावर्त्तनं कांस्यतथा च अपि तु क्षा[illegible]लनं मार्जनवचनमर्थः अल्पधान्यादिविषये बौधायनः व्रीहयः प्रोक्षणाद्भिः शु
द्धमूलफलानि च तन्मात्रस्यापहाराद्वानि स्तुषीकरणेन वा अनेकपुरुषोपार्ज्यविषये प्रपं[illegible]लं प्रोक्षणं चु कस्यापो ह्नमू
त्रि स्मृतिः मृत्पर्णतृणकाष्ठानां श्वाभिप्रागलवायसैः स्पर्शने विहितं शौचं सोमसूर्य्यांशुमारुतैः तथा प्रोक्षणेन पुस्तकमि
ति बौद्धित सिद्धान्ते मनुः पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति अवधूतं यस्योप
रि वाससोवधूननम् याज्ञवल्क्यः सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये पत्तु गोनमः नित्यमभोज्यं केशकीटावपन्नमिति
तत्स्वरूपकाभिप्रायम् पराशरः पक्षद्रोणाधिकं चान्नं श्वकाकाद्युपघातितम् ग्रासमुद्धृत्य तन्मात्रं यच्च लालाहतं भवे
त् हेमो हरकेन वा अभ्युक्षेद् गजनेनावुनायवा अग्निज्वालापि संस्पर्शान्सुवर्णमधुसर्पिषा विप्राणां च [illegible] संप्रोक्षणं हुतं भो
ज्यं च तेन भवेत् तथा अन्नमेकाहिकं पक्वं श्वकाकाद्युपघातितम् केशकीटावपन्नं च तत्सर्वं विशुध्यति कृतस्यापि पि
धिर्द्दष्टः एष एव मनीषिभिः इत्यल्प[illegible]धान्यविषयं तत्रेयम् द्रवविषये शंखः अपण्यतैलानामप्लवने गोरसस्य च

भाण्डानि स्थालयेदद्भिः शाकमूलफलानि च चकाराद्घृततैलयोरपि ग्रहणं वस्त्रान्तरितेपात्रे गृहीयः नष्टकांस्यपात्रस्य तप्ता
तोयद्रव्येण तथा पूरणं यथा द्रव्यं बहिर्निस्सरति न तन्मावनुमिति केचित् तथा आधारदोषेऽनुनये माधामाचान्तरङ्ग
वम् तथा बौधायनः देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् यातवल्क्यः
वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचीति अज्ञातस्पर्शविषयकसंशयनिश्चयसाधारणज्ञानाभाववत् चर्म
कोशानां कषायद्रव्येण शोधनमिति केचित् मनुः श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीदिति श्वभिर्हतमृगया
यां नरैरपि भक्ष्यम् तथा नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिरिति
स्त्रीमुखं रतिसमये शुचि स्त्रीमुखं रतिचुम्बने इति पर्युदनिस्सरणान् तथा नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्र
सारितम् ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितम् कारुहस्तस्तत्कर्मणि भैक्ष्यमनाचान्तस्यादित्तं नगवा
ण्डालादिस्पर्शे तथा शुचिरग्निरजो वायुरपो हविर्घृतं पयः सर्वोपि नानि मेध्यानि स्पर्शे छायायां च नित्यशः च
याचाण्डालादेरमा तथा ब्रह्मपुराणे चाण्डालपतितच्छायास्पर्शे दुष्यान्नतन्नभवेत् रजोपि रासभादेस्तत् तथा

वि० म०
३

शातातपः रेणवः शुचयः सर्वे वायुना ये समीरिताः ॥ अन्यत्र रासभाजाविश्वखरकरविमार्जनी अत्रैपंचमान्यभाव शब्दा

दस्तः तथा पाराशरः शुचिर्गोऽस्पृश्यमजाश्वानां मुखं शुचि गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम् अथ शुद्धिमा

हयाज्ञवल्क्यः भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणादपि सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् देवलः अथ दुग्ध

स्यासंतानाधारावान्तोद्गताश्च रेणवः स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन दधि सर्पिः पयः क्षौद्रं भाण्डदोषान्

विद्यते मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिर्निहि तथा उपस्पृश्य शुचिः स्पृष्टं तृतीयं चापि मानवः हस्तौ पादौ च

तोयेन प्रक्षाल्याचम्य शुध्यति प्रथमा शुचिस्तत्स्पृष्टो द्वितीयस्तत्स्पृष्टस्तृतीयस्तत्स्पर्शश्चाचमनमात्रम् चतु

र्थादीन स्नानाभावात् हरिहरभाष्ये वृद्धशातातपः शिशोरभ्युक्षणं कार्यं बालस्याचमनं स्मृतम् रजस्वलादि

संस्पर्शे स्नातव्यं च कुमारकैः बालादिस्वरूपं च तत्रैवोक्तम् प्राक्चूडाकरणात् बालः प्रागन्नप्राशनाच्छिशुः कुमा

रस्तु स विज्ञेयो यावन्मौञ्जीनिबन्धनमिति नदीशुद्धिमाह गार्ग्यः अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत्

शोध्यस्य मृच्च तोयं च संन्यासो वै द्विजन्मनामिति सर्वोपवादमरीचिराह येषु स्थानेषु यच्छौचं यावच्चैव मृ

त्रिका तत्रावत् निमित्तेशेषः येषु स्थानेषु यच्छौचं धर्मवित्सु तत्रादृशः तत्र तत्रावनं मन्येधर्मस्तत्रैव तादृशः येषु देशेषु
यद्वा येषु देशेषु ये द्विजाः परापरोपि भुगतीर्थित्वये धर्मास्तत्र तत्रैव ये द्विजाः तेषां निदानकर्तव्या गुरुरूपा हि
ते स्मृताः तथा यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः तथापि लौकिकाचारं मनसापि न लंघयेत्॥ ॥
॥ ॥ ॥ अथ गर्भस्रावाद्यशौचम्॥ ॥ ॥ ॥ तत्र पराशरः आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः अ
त ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति स्रावाशौचमाह मरीचिः गर्भस्रुतौ यथामासमचिरे तूत्तमे त्रयः राज
न्ये तु चतूरात्रं वैश्ये पञ्चाहमेव तु अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति अचिरे आद्यमासत्रये इदञ्च प्रसूताया एव
न सपिण्डानामुत्तमे ब्राह्मणे तथा चतुर्थमासादेव चत्वारीति विज्ञानेश्वरमाधवादयः एवं मातुः पञ्चमे पञ्चषष्ठ्यो
दे सपिण्डानामपि पञ्चमषष्ठयोरप्यहः पाते मातुर्यथामासं सपिण्डानां दिनत्रयमिति मारीचात् अथाशौचप्रक
रणे रात्रिषट्दिनपदं वाऽहोरात्रलक्षकं ज्ञेयम् एवमन्यत्रापि एतच्च गर्भनाशप्रयुक्ताशौचं सर्ववर्णेषु समम् मरी
चिवचनं तु विगीतत्वान्नादरणीयम् नहि वैश्यशूद्रयोर्गर्भस्य षण्मासेषु पञ्च दिनानि चतुर्थमासे तु मासमसंख्यानि च

अष्ट

तारिदिना नीतियमंतइतिकेचित् सप्तममासादिषु स्वजातमुक्तं सम्पूर्णमेव प्रसवाशौचं कार्यमिति दूषणम् स्वपत्न्या
अभिचाराद्धृतगर्भस्य प्रसवे पिण्डनक्षेत्रिणोरूर्ध्वारण्यकाहः तथाचैकाहानुवृत्तौ याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्या
स्वन्यगतासु चेति मातुस्तु तत्रापि उक्तैव व्यवस्था विशेषानुक्तेः स्वभार्यास्व संप्रतिलोमप्रतिरिक्तमाश्रितासु प्रसूतासु
चाहोरात्रमाशौचम् सपिण्डानां स्नानमात्रमिति मिताक्षरायाम्॥ ॥ ॥ ॥इतिगर्भस्रावाशौचम्॥ ॥ ॥
सप्तममासप्रभृति प्रसूतिविषये तारीनः जातमृते मृतजाते वा सपिण्डानां त्र्यहमाशौचमिति जननोत्तरं नाल
च्छेदोत्तरमेव शिशुमरणे सपिण्डानां दशाहं जननाशौचं पूर्वं मरणे तु सम्पूर्णावशिष्टे त्र्यहमिति तु न द्वर्णाशौचोप
लक्षणम् मनुरपि दशाहाभ्यन्तरे बालप्रमीतेतनस्याधवेः शौचाशौचं न कुर्वतेऽस्त्याशौचं विधीयते पञ्चजातमृते
मृतजाते वा कुलस्य सद्यः शौचमिति स्मृत्यन्तरं तच्छिशुमरणनिमित्ताशौचाभावपरम् मरणाशौचनिमित्तं स्ना
नमात्रमस्त्येवेतियधक्तुतः नालच्छेदात्प्राग्मरणेमातुस्सम्पूर्णं सूतकं सपिण्डानान्तु जन्मनिमित्तं त्रिरात्रम् तथा
च मनुः जीवन्जातो यदि ततो मृतस्सूतकएव च सूतकं सकलं मातुः पित्रादीनां दिनत्रयमिति मतस्तु दनन्तरमे

वनाभिवर्द्धनात्सर्वांगीणमितियावत् यत्तुजैमिनिः यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकम् छिन्नेनालेततःपश्चात्सूतकं
तुविधीयतइतितन्नालछेदोत्तरंशिशुस्पर्शसपिण्डानांस्थानार्थजन्माशौचपरमितिकेचित् शिशुजन्मनिनिमि
त्तकस्नानाद्यधिकारस्त्ववधितमेतेपांस्पर्शमितितुयुक्तम् अन्यथान्तराईसूतेनपराध्याहारापत्तेरिति जननेनि
मित्तमस्पृश्यत्वंमातुर्दशाहंपितुस्तुसचैलस्नानात्स्पृश्यत्वंगच्छतीमाहसंवर्त्तः पुत्रेजातेपितामधस्सचैलस्नान
माचरेत् स्पर्शयोग्यस्ततःपश्चाद्दशाहंभगवान्मनुरिति पुत्रइतिपुरुषमविवक्षितमनुपादेयगतत्वात्तेनकन्याप
त्तौपिपितुःस्नानमावश्यकम् सपिण्डानामस्पृश्यत्वनास्त्येव अनेनेतेषांस्नानमपिमहाहागिराः सूतकेसू
तिकावर्जसंस्पर्शोननिषिध्यतइति वैधकार्येतुपैठीनसिः सूतिकांपुत्रवतींविंशतिरात्रेणकर्मकारयेन्मासे
स्त्रीजननीमिति दशाहपर्यन्तमाशौचेनैवंकर्मानधिकारमाश्रजेन्मप्रभृतिगणनायांविंशतिरात्रमासपर्यन्तो
मात्रदशाहाशौचेतुवाहाब्राह्मणावशिष्टदिनाशौचविधानुपात्स्वैरूप्यापत्तेर्मासाशौचवन्नसूद्रप्रमानर्थक्यप्रसंगाच्च
यस्यमावदशौचंमात्रंतदुत्तरमेवविंशतिरात्रमासंचकर्मानधिकारइतिकश्चित् तन्नुच्छेम् पत्रस्यैकेनैवपदेनसा

त्रि०म०
५

यूपैकं पशार्थमस्तु दिश्यते ऽन्यं च मस्तु पारीयनेन तत्रैव रूपम् यथा वाजपेयेन स्वाराज्यकामो यजेतेति पञ्ज़िपदेश्च हस्तु स्थालो ने
री हि तु अधिकानधिकारमात्रबोधनान्न तत् अन्यथा ह्यादर्श्णहोनस्य समन्नापि महत्तिन तत्स्लिसतणामुपसहायात्र सत्त्वद्धोतुबाहो
धिकार्थविधिरिति वैरूप्य स्यात् अतोनन्यभरष्टमवविंशति रात्र्नासपावद्भात्राह्कर्मानधिकारो बोध्यत इति गानु
रणास्तु मात्रहृदयशमनीद्देनादि कर्मानधिकाराव्यधिवाधेनाव्यन्तरमेवेद्बोध्यते दीक्षितानुदहानिन जुहोतीति होमानधि
काराव्यधिभूतदीक्षान्मोचकावभृथान्तरत्ववाधेनैत यापुनराधेयसमितन यस्य छाग्निरात्रे ज्जुहानीत्तुदवमानीयरूपाधु
ध्यन्तरवाद्दिति युक्तमुत्पश्यामि प्रथमषष्ठदशमदिवसेषु दानस्तिकाष्टहद्वनादूजनमाचार्यनाशौचम यदाह्वयोस
प्रथमदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषु नकुर्वीत सूतकं पुत्रजन्मनि अन्यत्रापि तत्र सर्वश्रुतियास्संकुलात्तन्त्रु
नभक्षयेन भक्षयित्वा तु तन्मोहाद्द्विज श्चान्द्रायणं चरेत्॥ ॥ ॥ ॥ इति जन्माशौचम्॥ ॥ ॥ ॥ अथानु
पनीताशौचम् तत्र नामकरणात्प्राक् मृतो यः स वः प्राङ्नामकरणात्सद्यः शुद्धिरिति नामकरणादि तत्कालापल
हातं तत्र जननादिवत् नामकरणकालस्तु प्रकारद्वेशे ऽहनि तत्र मासे दशवा उद्धे एकादशे वा इति मासात्र तु वर्णेषु स्तूत्

राम
५

तएवनामकरणंसद्यःसुप्तवधिरितिकेचित् नामकरणानंतरमप्युदकनाम्नैकालिकम् यथाहमनुः नात्रिवर्षस्य क-
र्त्तव्याबांधवैरुदकक्रिया जातदंतस्यवाकुर्यान्नाम्निवापिकृतेसति उदकमग्नेरप्युपलक्षणम् नात्रिवर्षस्येत्युक्तेः सू-
त्रवर्षेपिवर्षत्रयादूर्द्ध्वमुदकदानादिनियतम् चूडाकर्म द्विजातीनांसर्वेषामेवधर्मतः प्रथमेब्देतृतीयेवाकर्त्तव्यं
श्रुतिचोदनादिति अधिवर्षीयचूडाकर्मानंतरमप्युदकदानंनि [illegible]यनम् तदुक्तम् तू-
ष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवच सर्वेषांकृतचूडानामन्यत्रापीच्छयाद्वयम् अन्यत्रनामकरणादूर्द्ध्वमकृतचूड-
स्येच्छयाप्युदकदानंनिखननंवा यथाहयाज्ञवल्क्यः ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंततः आश्मशानमनुव्रज्य
इतरोज्ञातिभिर्वृतः इतरःपूर्णद्विवर्षःऊनद्विवर्षस्यनिखननमेवेत्याचारः मनुरपि ऊनद्विवर्षमाधिकृत्यारण्ये
काष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवतुइति नामकरणात्प्राक्सर्वेषामघंस्यशौचम् नामकरणादूर्द्ध्वंदन्तजननकालात्स-
त्तममासलक्षणात् अग्निसंस्कारएकाहः असंस्कारसद्यःशुद्धिः मातापित्रोस्तुनामकरणादूर्द्ध्वमुपनयपर्य-
न्तंसर्वेषांत्र्यहएव निरस्ततुपुमान्शुक्रमुपस्पृश्यैवविशुद्ध्यति वैजिकादभिसंबंधादनुरुध्यादघंत्र्यहमितिकार्य

कारणसंबंधेऽभिहितेः ततो दन्तजननादि प्रथमवार्षिकचूडाकर्मपर्यन्तमहोरात्रम् प्रथमवर्षादि त्रिवर्षपर्य्यन्तमकृ
तचूडस्य कृतदाहस्याप्येकाहः यत्तु गिरोवचनम् यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः दाहयित्वा तथाप्येनमाशौचं
त्र्यहमाचरेदिति तत्कुलधर्मानुरोधेन वर्षत्रयादिचूडालक्षविषयम् विप्रेऽनूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकीति नैषो
ऽकृतान्कृतचूडस्य तु त्रीणि वर्षत्रयादि कुलधर्मानुरोधेनाकृतचूडस्याप्यत्र्यहमेव उपनयनादि दशरात्रमादि
म् अत्र सर्वत्र दन्तजन्मनः सप्तमासात् नैशिकोऽस्त्वा त्रिरात्रमाव्रतो दशाहः दशरात्रमनन्तरमित्यादिवचनानि
मिताक्षरा[illegible]दावनुसंधेयानि अत्र दन्तजननपदेन दन्तजन्मकालो लक्ष्यते स च सप्तमो मासः दन्तजन्म सप्तमे
मासीत्युपनिषद्दर्शनात् चूडापदेनापि स्वकालो लक्ष्यते स च तृतीयं वर्षम् तृतीयवर्षे चौलं यथाकुलधर्मं वेत्या
श्वलायनोक्तेः यद्यपि प्रथमे वा तृतीये वेति प्रथमवर्षविधानं तथापि विप्रे ऽनूनत्रिवर्षे तु शुद्धिस्तु नैशिकीति तृ
तीयवर्षपर्यन्तमेकरात्रविधानात् तृतीयाब्द एव लक्ष्यते व्रतमुपनयनं तेनापि स्वस्वकालः षड्वर्षान्तररूपाल
क्ष्यते इति रुद्रधरः अत्र च देशाचाराद्व्यवस्था शेया अपरमृतौ तु नामकरणादि वर्षत्रयपर्यन्तमकृतचूडा

या:शौचम् अचूडायां तु कन्यायां सद्यः शौचं विधीयते इत्यापस्तम्बोक्तेः ततो वाग्दानपर्यन्तमहोरात्रम् प्रथमवर्षेकृत
चूडायामपि मृतायां वाग्दानमहोरात्रमेव अत्र विशेषेण वर्णानामर्वाक्संस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः क
न्यास्वह्नो विधीयते इत्यङ्गिरोक्तेः एतद्विषयकमहर्विषय एव कन्यास्वेकाह इति ग्रन्थकृतः यातवल्क्योपि अहस्त्वद
त्तकन्यासु बालेषु च विशोधनमिति बालेषु जातदन्तेष्वग्निसंस्कार इति विज्ञानेश्वरः वाग्दानादूर्ध्वं विवाहसंस्कारा
त्प्राक् पतिपक्षे पितृपक्षे च त्रीण्यहोरात्राणि स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः यथोक्तेनैव कल्पेन
शुध्यन्ति तु सनाभयः इति मनूक्तेः बान्धवाः पतिसपिण्डाः सनाभयः पितृसपिण्डाः एतन्नान्तरं हि वि [illegible]
[illegible] वाहात्प्राक् कृत्स्नाशौचं वि
पुरुषमेव अत्र मन्त्रानानुस्त्रीणां विपुरुषो विज्ञायत इति वासिष्ठात् अत्र सर्वत्र मातापित्रोः प्रथमपत्नस्य च स्वाशौचं वि
शेषाद्वर्णादिति केचित् मरुन्तरत्नानिर्णयामृतेषु शंखस्तु विशेषमाह अजातदन्तास्वपि यो रक्तगात्रामि
ति इहैव नाधियन्ते इति शिष्टाः विवाहानन्तरं विष्णुः संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पि

वि०म०
७

नगृहेस्नातानां नैकरात्रं त्रिरात्रं चेति पक्षद्वयं एकरात्रं मरणे त्रिरात्रमिति भेदः पित्रोर्गृह इति विशेषणात्पतिगृहे सम्
क्षपक्षद्वयमरणयोः प्रसवे सर्वेषामाशौचं तत्रास्त्येव मरणेपि पित्रोस्त्रिरात्रमस्त्येव वैजिकादभिसम्बन्धादनुरुध्यादघं
त्र्यहम् प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीति विशेषेणास्म
रणान्ते माधवस्तु दत्तानारी पितुर्गृहे सूयेताथ म्रियेत तथा तद्बन्धुवर्गस्त्वेकेन शुचिस्तज्जनकास्त्रिभिरिति ब्राह्मवच
नात्प्रसवेपि पित्रोस्त्रिरात्रं भ्रात्रादिबन्धुवर्गस्यैकरात्रमित्याह पित्रोर्मरणे विवाहितकन्यायास्त्रीण्यहोरात्रा
णि पित्रोरुपरमे स्त्रीणां मूढानां तु कथं भवेत् त्रिरात्रेण तु शुद्धिः स्यादित्याह भगवान्यमः इति वचनात् अवि
वाहितायास्तु पुत्रादीनामिवाशौचमिमासादित्रयम् एतदाशौचं सर्ववर्णसाधारणं वयोविशेषकृतन्त्वाहिति
गुलं वयसि सर्वेषामतिक्रान्ते तथैव च उपनीते तु विषमं तस्मिन्नेवातिकालजमिति व्याघ्रपादोक्तेः अशौ
रमेदत्तक्रीतक्षेत्रजादिष्वसन्नेषु मृतेषु च जनकस्य त्रिरात्रेण अप्रतिलोमव्यतिरिक्तमात्रिमातासु पत्नीषु प्रसूता

राम
७

वि० मु०
८

शास्त्रीयपुत्रविषयं वाव्यारव्येयमिति तस्मादृत्तकमरणे त्रिरात्रमिति भावः तातचरणा उपनीतदत्तकमरणे सापि
ण्डान्वितगृहीतृतत्तस्य पिण्डादेयो दत्त्वाहमाचरन्तीति शिष्टाचारः उक्तवचमाव्यवस्था चैवं विष्णुयाज्ञवल्क्योक्तं त्रिरा
त्रैकरात्रन्तु प्रीतयहीतुः सन्निधिविदेशभेदेनानुपनीतदत्तकादिमरणे एकाहस्तु सपिण्डानामिति मार्गी । यत्तु प्र
तिगृहीतृसपिण्डानां तु चूडाकरणकालानन्तरमरणे गोत्रिणः स्नानमुदास्पृशेति माजापम्मन्तु दत्तजननोत्तरं म
रणे त्रेयमिति प्राञ्चः अत्र दत्तकपुत्रमरणे जनकादेर्जनकादिस्तेते दत्तकसनाशौचमानाभावात् यत्तु कस्मिंश्चिदि जि
ज्ञातिसम्बन्धादनुरुध्यादेवमहमिति वचनादहमिति न तत्तुच्छम् गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः गो
त्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति मनुवचने गोत्ररिक्थसुधापदैर्जनकादीनां परस्परसम्बन्धप्रयुक्तका
र्यलक्षणे जातपुत्रः क्षपकेयोग्निनादधीते तत्रैव व्यवस्थाविशेषस्तेन तु लाञ्छितकार्यमात्रनिवृत्तावाशौचस्य
पि निवृत्तिर्न सिद्धेः अन्यथा यावदुच्चनं वाचनिकमिति मायादत्तकसोदरादीनां परस्परसम्बन्धानिवृत्तमाधाडा
शौचरिक्थग्रहणादेः परस्परमधिकारापत्तेश्चेति दिक्॥ ॥ःः॥ ॥ अथोपनीतसपिण्डमरणाशौचमनुः ॥

सुमृतासु च त्रिरात्रं तत्तु मन्सपिण्डमापिण्डेरिश्वाहारि॥ तथा च त्रिरात्रानुवृत्तौ विष्णुः अनौरसेषु पुत्रेषु जातेषु च मृते
षु च परपूर्वासु भार्यासु प्रसूतासु मृतासु चेति। याज्ञवल्क्येन तु एकाहउक्तः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु चेति
एतेन त्रिरात्रैकरात्रे सन्निधिविस्थभेदेन व्यवतिष्ठेते अनौरसपदेन चौरसाधर्म्मपत्नीज इति भाषितौरसाभिन्ना गृह्यन्ते
तेन जनकस्य सपिण्डानां त्रिरात्रैकरात्रे सुतस्य यद्यपि तु त्रिरात्रं तदा सपिण्डानामेकरात्रम्। सूतके मृतके चैवं त्रिरात्रं
परपूर्वयोः एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुरिति मारीचात्। पित्र्यहलपस्तु पलहारेणम् तथा च हारीतः
परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च भर्तृपित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिण्डजन इति पितुरेकरात्रं पक्षे सपिण्डानां स्ना
नमात्रम्। असंस्कृतेषु दारेषु परपत्नीसुतेषु च गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेति प्रजापतिरुक्तः य
द्यपि स्नानस्य पितुस्त्रिरात्रसमानविषयत्वं प्रतीयते तथापि हारीतमारीचविरोधाय पितुरेकरात्रविषय
एव सपिण्डानां स्नानकल्पनीयम्। एतत्तु सद्यश्शौचानुवृत्तौ यमः अन्यपूर्वासु भार्यासु पुत्रेषु कृतकेषु च भार्यासु
त्रेष्वयं स्वसम्बन्धिशब्दत्वादुपस्थितयोः पतिपित्रोः सपिण्डानामिति व्याहारेण सपिण्डविषयत्वेन वर्णनं भार्याश्च

स्याहं शावमाशौचं सपिण्डेषु विधीयते जननेप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् अत्र सपिण्डेष्विति मृतविशेष
णम् तेन मूलपुरुषमारभ्याष्टमान्तं जननमरणयोर्मूलपुरुषस्यापरमन्ततो द्वितीयादेरष्टमावधिकायाः स्याहमेवा
शौचम् द्वितीयादिस्थानं मूलपुरुषस्य सपिण्डत्वेन तस्मिन्नन्तरपि सापिण्डत्वात् मूलपुरुषमारभ्य द्वितीयादेर्जननम
रणयोरष्टमादेस्सोदकत्वं मेधुक्तं त्रिरात्रम् अष्टमादिस्थानं मूलपुरुषस्य सोदकत्वेन तस्मिन्ननन्तरेऽपि सोदकत्वात् न
त्वनयोस्त्वनस्यापिण्ड्याकेनु मूलपुरुषद्वारकमेव तेसात्सापिण्डश्रुतिपायोगभेदेन भिन्नधर्मकपर्यायमेक
तो निरन्तमनन्तो नानिवर्त्तत इति केषाञ्चिदाचरणानुसारीति निष्कर्षः वस्तुतस्तु दशाहेन सपिण्डाः शुध्यन्ति मृतसू
तके दशाह एवमिमस सपिण्डमरणे सूतिरित्यादिवचने परस्परसापिण्डजननमरणयोरेव दशाहमतोऽन्तः स
प्रतियोगिकत्वेन एकतोऽनिवृत्तावप्यन्यतो निवृत्तिर्युक्ता तेन एवञ्जीत्साहरणे परस्परसोदकत्वमप्युक्तं त्रिरात्रमेव
मुक्तम् एवञ्च सपिण्डे सन्ततेस्सापिण्डत्वं निरवधिकं किन्त्वष्टमावध्येव तथाच मनुः सपिण्डता तु पुरुषे स
प्तमे विनिवर्त्तते समानोदकभावस्तु जन्मनाम्नोरवेदने अग्निपुराणे तु निवर्त्तेताचतुर्दशादिति चतुर्थः पारस्कस्म

मेनाने मूलपुरुषस्य नप्तृस्तत्रेतेष्वपरस्परं विनिवर्त्तन इति शेषः मात्स्येऽपि लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभा
जिनः पिण्डदस्सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् पिण्डदस्य मूलपुरुषमभिव्याप्य मूलपुरुषस्य चापि पिण्डदमभि
व्याप्य परस्परं सापिण्ड्यमित्यर्थः अत एव सपिण्डानां सप्तमपुरुषावधिकानामविशेषेण त्र्यहरात्रं सूतमानाद
कानान्तु त्रिरात्रमिति वदतां विज्ञानेश्वरादीनामयमेवाभिप्रायः यद्यप्यनयाशैला सापिण्ड्यं सैकतानिष्ठन्त
त्वात् सप्तमास्त्वं तस्यादितीयादिकोऽप्यासात्तयापि पञ्चमात्सप्तमात् ऊर्ध्वं मातृतः पितृतस्तथेति याज्ञवल्क्येन मातृ
पितृकुले सप्तमपञ्चमपर्यन्तं सापिण्ड्यं तेनैव तद्व्यपत्तिः मातृतो मातरं ईष्ट हेतुतापरपमानेयः पञ्चमस्तदूर्ध्वमत्रपि
तृतः पितरं ईष्टहेतुताप्रसप्तमस्तदूर्ध्वं सापिण्ड्यं निवर्त्तत इत्यर्थः तदुक्तं सप्तममाभियुक्तैः बध्वा वरस्य वा तातः कूट
स्थाद्यदि सप्तमः पञ्चमीचेत्तयोर्माता तत्सापिण्ड्यं निवर्त्तत इति दिक्॥ ॥ॐ॥ ॥ क्षत्रियाद्याशौचमाह
याज्ञवल्क्यः॥ ॥ॐ॥ ॥ क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः
पाकयज्ञद्विजशुश्रूषादिरतः शूद्रो न्यायवर्त्तितस्य पक्षः आङ्गिरास्तु सर्वेषामेव वर्णानां सूतके मृतके तथा दशा

दाच्छुद्धिरेतेषामिति शातातपोऽब्रवीदिति अत्र देशाचारतो व्यवस्था इदं च दशाहिकं ताशौचमुपनयनोत्तरं ततः पूर्वं त्र्यहा
रात्रत्वात् शूद्रो वस्त्रपरिग्रहादिति वचनात् उपनयनस्थानीयवस्त्रग्रहोत्तरमतः शूद्रस्याशौचं निमित्तम् इदं चाशौचमन
हिताग्नेर्मरणदिनात्कार्यम् आहिताग्नेस्तु दाहदिनात् तथा च पैठीनसिः अनग्निमत उत्क्रान्तेराशौचं हि द्विजादि
षु दाहादग्निमतो विधाद्देशमरणे सति आहिताग्निश्चेत्यसमवसन्नाग्निर्येन पुनः संस्कारकृतस्तथ च दशाशौचमि
ति वशिष्ठोक्तेश्च अस्थिसंचयनन्तु द्वयोरपि दाहदिनमारभ्यैव अनग्निमत उत्क्रान्ते साग्नेः संस्कारकर्मणः शुद्धिः
संचयनं दाहान्मृताहस्तु यथाविधीति विप्रस्यासवर्णस्यापि एवं जन्ममृत्याशौचमाह हारीतः दशाच्छुध्यते विप्रो
जन्महानौ स्वयोनिषु षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु क्षत्रियवैश्ययोराह विष्णुः क्षत्रियस्य विट्शूद्र
योरपि एवं षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रस्यापि एवं षड्रात्रेण शुद्धिरिति दासादीनान्तु स्वामिशुद्ध्या शुद्धिः कर्मान
धिकारस्तु मासम् तथा चाङ्गिराः दासी दासश्च सर्वो वै यस्य वर्णस्य यो भवेत् तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सू
तकमिति प्रतिलोमा धर्महीना इति स्मरणान्न तेषामाशौचं किन्तु केवलं जनने मरणे च मलापकर्षणार्थं शौचमा

वि॰ मु॰
१०

त्रम् क्वचित्सद्यश्शौचमाह देवलः उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च सद्यः सन्तिष्ठते यज्ञस्तथाशौचमिति स्मृतम् स
द्यःशौचमित्यन्वयः यज्ञोस्याहकर्म एकाहेनैव तथा डिंबाहवहतानां चाविद्युता पार्थिवेन च गोब्राह्मणस्य चैवार्थे
यस्य चेच्छति पार्थिवः शस्त्रं विना कलहो डिंबाहवः राजा यं स्वकार्यमिच्छति तस्य सद्यश्शौचमित्यर्थः यत्तु यम
डिंबाशनिहतानां च तथैव प्राणसत्रिणाम् नदीश्वापदसंदष्टिभस्य सद्यश्शौचं विधीयते इति तत्र नदीग्रहणं जल
मात्रोपलक्षणम् तत्र प्रायश्चित्ताद्यर्थं नगानानम माहतेति शुद्धिविवेके प्राणसत्रिणः परस्य रक्षणार्थं प्राण
त्यागिनः यत्तु वृद्धहारीतेन महाहवे विद्युता च राज्ञा गोविप्रपालने सद्यश्शौचं हतस्याज्ञस्त्र्यहं चान्ये महर्षयः इति
त्र्यहमुक्तम् तत्र राजसु हतस्य गाढप्रहारपीडया षड्विरामोत्तरं रणाङ्गणाद्बहिर्मृतस्य वाच्यम् इत्थं च यु
द्धमृतस्य सद्यःशौचादिकं युद्धे इत्येन प्रहृतस्यैव नायुध्यतः अग्न्यस्त्रकाले दर्शस्याभयुनिष्ठतात् अनस्त
मितो यथोक्तमेव रात्रौ जन्ममृत्यो रजस्तु विशेषमाह कश्यपः उदितेऽनुदये वास्य नारीणां दृश्यते रजः जन
नं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी अर्द्धरात्रावधिः कालस्सूतकादौ विधीयते रात्रिं कुर्यात्त्रिभागान्तु द्वौ भा॰

मौपूर्वपक्षस्तु उत्तमोंऽयः ऽथमातृतेनयजतेऋतुस्नातके गच्छावेवसमुत्सन्त्रेमृतेरजसिसूतके पूर्वमेवाह्निंयाद्यंयावन्नाभ्युदितोरविः
स्वाचारतोव्यवस्था नचापित्रिभागपक्षमेवाङ्गिर्यन्तेनशिष्टाहृद्रस्त्र रजस्वलाविषयेस्मृत्यन्तरे शुद्धाभर्तुश्चतुर्थेह्निस्नानेननुसी
रजस्वला दैवकर्मणिपित्र्येचपञ्चमेहनिशुध्यति पञ्चमेह्नीतिरजोनिवृत्त्युपलक्षणम् स्पर्शादिषुतुपरतोपिरजसिचतु
र्थेह्निस्नानेनशुध्यति दैवपित्र्यकर्मविषयेचतुर्थेह्निस्नातापिरजोरहितैवयोज्येत्यर्थः विशेषमाहात्रिः रज स्वलायु
ह्निस्नातापुनरेवरजस्वला अष्टादशाहेनार्वागशुचित्वंनविधत्ते एकोनविंशतेरर्वागेकाहंस्यात्ततोऽत्र्यहम् विंशात्प्र
भृत्युत्तरेषुत्रिरात्रमशुचिर्भवेदिति रजोदर्शनमारभ्यपुनस्सप्तदशाहेनाभ्यन्तरेरजोदर्शनेऽशुचित्वंनास्ति अष्टा
दशेत्वेकाहाच्छुद्धिः एकोनविंशेद्व्यहाद्विंश[illegible]त्प्रभृतिषुत्र्यहाच्छुद्धिरित्यर्थः यस्माद्विंशतिदिनोत्तरमेवर्तुधारजो
दर्शनेनतद्विषयोयमशुचित्वप्रतिषेधः यस्मात्पुनर्युवत्याअष्टादशाहेनार्वागेवप्रायेणरजोनिःसरणंतस्माद्वि
रात्रमेवाशुचित्वमितिमिताक्षरायाम् यत्तुचतुर्दशाहेनार्वागशुचित्वंनविधत्तइतिस्मृत्यन्तरंतत्रस्नानप्रभृतित्रि
रात्रमभिप्रेतमितिनविरोधः रजस्वलासूतिकयोःस्पृष्टौविशेषःस्मृत्यन्तरे पञ्चभिःस्नापयित्वातुगव्यैःस्नेनारजस्वलाम्

वस्त्रान्तरावृतांकृत्वा दाहयेद्विधिपूर्वकम् अन्नोऽपि पठतो सूतिका तु यदा नारी विस्नाता मरणं गता त्रिवर्षं पूर्णपर्यन्तं स्थ
ध्येत्कृच्छ्रेण सर्वदा एतदाद्यपक्षविषयम् सूतिका तु यदा नारी रजसा तु परिप्लुता म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाच
रेत् एतद्द्वितीयपक्षविषयम् सूतिका तु यदा साध्वी विस्नाता मरणं गता स्वयं कृच्छ्रेण शुध्येत्तु व्यासस्य वचनं यथा ए
तत्तृतीयपक्षविषयम् दशाहोत्तरन्तु सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् मासमेकावधिं यावद्द्विजाभिः कृच्छ्रैर्वि
शुध्यति तथा सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः कुम्भे सलिलमादाय पञ्चगव्यं तथैव च पुण्यपूर्वैरभि
मन्त्र्यापो वाचा शुद्धिं लभेत्ततः तेन तां स्नापयित्वा तु दाहं कुर्याद्यथाविधीत्यादि देवलवचनाच्चापोहि [illegible] ष्ठेति तिसृः
हिरण्यवर्णाश्चतसृः पवमानुमेति नवर्चानुवाकः एतन्नियक्षहोरकोमिति ॥ ॥ ॥ ॥गर्भिणीमरणेपि स्मृत्यन्तरवि
शेषः॥ ॥ ॥ ॥यदा गर्भवती नारी सशल्या सुस्थिता भवेत् अक्षोभिता तनस्थशल्यं निर्हरेद्यदि जीवति ममी
तेनादिपेत्तनु भायार्थे ततः परम् त्रयस्त्रिंशत कृच्छ्रैस्तु शुध्यते शल्यघातनः सगर्भदहनेनतु तेहर्णं जबुधपातक
मिति अत्र तु शुद्धिमाह पराशरः आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतु

समन्वन:
पञ्चमान
सूत्रं ७

रः उशना जराभिभूतायानारीरजसा च परिप्लुता कथं तस्या भवेच्छौचं शुद्धिस्याच्चैव कर्मणि चतुर्थेहनि सम्प्राप्ते स्पृ
शेदन्यान्तु तां स्त्रियम् सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः अन्ते च
वाससां त्यागस्ततः शुद्धा भवेत्तु सा दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यतीति ॥ ॥ ॐ ॥ ॥ अथ मृतौ विशेषमा
ह मस्करले मनुः वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः तस्य
त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् इत्यादिना त्रिरात्रमुक्तम् एषादि विशे
षणादासन्नमृत्युकालपरमेतत् अत्रासन्नमरणानां त्रिवेणीप्रवेशपतिसहगमनादिना वैधमृतौ तु स्नाहमेव सा
धारणम् शुद्धिविवेके तु त्रिवेणीप्रवेशादौ तु सद्यश्शौचमुक्तं न तु न च किंचित्साधारणं मूलं चाण्डालादिहतस्याशौचा
दिनिषेधे तु अङ्गिराः चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतानलात् दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् उद
कं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यतीति एतच्चात्मघातोद्देशकत्वमा
पारमिति प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति गौतमोक्तेः प्रायो महाप्रस्थानम् ह

नानां तु पञ्चगोविधैरन्त्यसंचायात्मघातिनामिति याज्ञवल्क्योक्तेः ॥ तद्व्यवतिपत्तिश्च स्मृत्यन्तरे गंगायां प्रक्षिपेद्देहं सरित्वमा
सुचान्न तः इति ॥ अथ भारद्वाजमिताक्षरायाम् वैतानं प्रक्षिपेदग्नौ गृह्याग्निं च चतुष्पथे पात्राणि च दहेदग्नौ यजमाने वृथा
मृते इति वृथामृतेर्वृथात्मघातेन तथा महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि पुत्रस्तामालयेदग्नीन् प्रकुर्व्या दो
षसंक्षयात् प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदमिति ॥ आ
त्मघाते प्रायश्चित्तं निगमे ॥ आत्मघातेच्छुरथ्येवरे चान्द्रायणद्वयम् तप्तकृच्छ्रचतुष्कं च त्रिंशन्निकाणि च
चरेत् आत्मघातेच्छाहारे प्रायश्चित्तं मिताक्षरायाम् कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथाम् रज्जुच्छेदाश्रु
पातं च तप्तकृच्छ्रेण शुध्यतीति ॥ पद्युमिताक्षरायाम् स्पर्शमात्रे चैकरात्रोपोषणमिति तत्र तप्तकृच्छ्रश्शङ्खोक्ता
ष्टा घृततीरितस्पर्शवायव्यम् तप्तकृच्छ्रस्तु गर्भक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् एकरात्रोपवासश्च तप्तकृच्छ्र
उदाहृत इति ॥ संवत्सरादूर्ध्वं गवादिहतानामपि दाहादिकार्य्यमेव गवादिहतानां च पतितानां तथैव च ॥ ५
ऊर्ध्वं संवत्सरात्कार्य्यं सर्वमेव यथाविधि दाहादिकमिति षड्त्रिंशन्मतात् नारायणबलिं कृत्वा तु तदैव कार्य्यं श्रुवाकसंवत्स

रात्कुर्याद्दहनादिग्यथोदितम् कृत्वा नारायणबलिमनित्यत्वान्नरायुषः पुनिस्मृतेः नारायणबलिः कार्यो लोकगर्हा
भयान्नरैः तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः इति च्छागलेयोक्तेश्च विप्रस्य समवेयेद्धवयमवेधस्तनन्तथा एका
दश्यां च शुक्लायां पञ्चम्यां श्रवणेन वा रुद्रयामृतानां शुद्ध्यर्थं कार्यो नारायणो बलिः दशपिण्डान्घृताभ्यक्तान्दर्भे
षु मधुसंयुतान् तिलमिश्रान्प्रदद्याद्वै संयुतो दक्षिणामुख इति॥ ॥ः०ः॥ ॥अथ शौनकस्मृत्युसारात्नु
सारीप्रयोगः॥ ॥ः०ः॥ ॥शुक्लैकादश्यां पञ्चम्यां श्रवणेन वा तिथ्यादि स्मृत्वामुकशर्मण और्ध्वदैहिके सम्प्र
नत्वसिद्ध्यर्थं नारायणबलिं करिष्ये इति संकल्प्य पञ्चकलशान्सजलान्व्रीहिषु यवेषु वा गन्धसर्वौषधि दूर्वाप
ल्लवसर्वमृत्फलरत्नसुवर्णशकलयुतान्वस्त्रवेष्टितान्संस्थाप्य तेषामुपरि ताम्रादिपात्रेषु ब्रह्मविष्णुशिवान्
वैवस्वतं यमं प्रेतं च पूजयेत् तत्र क्रमान्मंत्राः हिरण्यगर्भः पुरुषस्य त्र्यम्बकम् कद्रुद्राय यमायसोमम् चतुर्थे
न्तेन मांत्रेण प्रेतनाम नामतो गृह्योक्तमार्गेणाग्निस्थापनादि नारायणादिभ्यः स्वमन्त्रेण पुरुषसूक्तेन प्र
त्यृचं षोडशाहुतीर्हुत्वा स्विष्टकृदादि समाप्य दशपिण्डान्प्राचीनावीती दक्षिणाग्रेषु कुशेषु हुत्वा यन्ते यमामिति सूक्तेन

नानुमंत्र्य शंखोदकेन कुशैरभ्युक्ष्याभ्यर्च्य प्रवर्हणान्तं कृत्वा नद्यां प्रक्षिप्यामुकशर्माऽमुकगोत्रो विष्णुरूपी दृष्यतिनि पुरु
षसूक्तेन सप्तनत्व मन्त्रमुच्चारयेत् षोडशवारं ततस्सन्तर्प्य ब्रह्मा विष्णुर्महादेवा यमश्चैव सकिंकरः पंचैते हि लोकं कुर्वन्तु मे
तस्य चेमं भागं गृहीत्वा मिमिव संप्रोष्ठो प्रार्थयेत् ततः पंचपादरोमितमन्त्रं बलिं दत्वा प्रातः स्वयं त्रिविधफलघृतशर्करा
मधूनि निवेद्य परेद्युः नक्तं भक्ष्याश्राद्धार्थं पंचविंशानाम रात्रिं जागरणेनातिवाह्य परेद्युः समध्याह्ने ब्रह्मादीन्संपू
ज्यातिथ्यादि संकल्प्यामुकशर्मणामुकगोत्रस्याहं दैहिकसम्प्रदाननत्वयोग्यतासिद्धये पंचैकोद्दिष्टश्राद्धानि तंत्रे
णा करिष्ये इति संकल्प श्राद्धानि कुर्यात् तत्र देवता ब्रह्मादय एव ब्रह्मादीनां पिण्डपूजादानादिषु समंत्रकेन विप्रा
याधिकार दक्षिणाभूहिरण्यादिकास्यक्षयस्यानेकश तिलतुलसीयुतं संकल्पधारेति विशेषः ततस्ते विप्राः पवित्र
हस्ताद्वामुकशर्मणेऽमुकगोत्राय प्रेताय विष्णुरूपिणे इदं तिलोदकमुपतिष्ठतामिति प्रत्येकं तिलोदकं दद्युः
यजमानः स्नात्वा गुडशर्करापायसादि प्रतं स्वजनयुतो भुञ्जीतेति नारायणबलिप्रयोगः मरणाद्दशे तु सं
वत्सरोपगमनादिना सर्पेण हतेति वर्षपर्यन्तं प्रतिपंचमि नागं संपूज्य वर्षान्ते नारायणबलिं कृत्वा सौवर्णं ना

गंगं च विप्राय दत्त्वा सर्वमौर्द्ध्वदैहिकं कुर्य्यात् तथा च व्यासः पुराकल्पं पपाठ सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गाम् व्या
सायविधिं दत्त्वा पितुरानृण्यमाप्नुवान् भारनिष्पन्नमिति वा पाठः भारः पलसहस्रद्वयं तुलास्त्रियां पलशतं भारस्स्या
द्विंशतिस्तुलेति कोशात् एतत्पाठे भायोऽर्थस्तत्राथ विधिः प्रमादमृतानां तु चान्द्रायणेन प्रकृच्छ्रद्वयं तस्य विशुद्ध
ये इति प्रायश्चित्तं कृत्वा सघृ एव दाहादिकार्य्यम् तथा चाङ्गिराः अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः त
स्याशौचं विधातव्यं कर्त्तव्या चोदकक्रियेति पुराणे असाध्यव्याधिना युक्तस्स्वाध्याशाराक्षमः पुमान् प्रविशेत्तेनलं
दीप्तं करोत्यनशनं तु वा अगाधतोयराशिं वा भृगोःपतनमेव वा गच्छेन्महापथं वापि तुषारगिरिमादरात् प्र
यागवटशाखायां देहत्यागं करोति वा स्वयं देहविनाशश्च प्राप्ते काले महामतेः उत्तमान्नाप्नुयाल्लोकान्नात्मघा
ती भवेत्क्वचित् महापापक्षयात्स्वर्गे दिव्यान्भोगान्समश्नुते एतेषामधिकारोऽस्ति सर्वेषां सर्वजन्तुषु नराणा
मथ नारीणां सर्ववर्णेषु सर्वदेति उर्द्धोच्छिष्टादिमरणे पराशरः उर्द्धोच्छिष्टे त्वधोच्छिष्टे अन्तरिक्षे मृते
यदि कृच्छ्रत्रयमकुर्व्वीत आशौचमरणे पिबेत् तथा उर्द्धोच्छिष्टे त्वधोच्छिष्टे भयोच्छिष्टे तथैव च अस्प

प्रा०वि०म०
१४

श्वपस्पर्शमरणे खट्वासै मरणेपि च श्वानक्रव्यादस्पर्शे कृमिकीटेष्वपि च एतद्दोषानुसारेण प्रायश्चित्तं समाचरे
त् कृच्छ्राणि षट्पञ्च स्थाने चान्द्रायणमथापि वेति एतद्दोषानुसारेण प्रायश्चित्ततारतम्यं कल्प्यम् ब्रह्मचारिमर
णे स्मृत्यन्तरे विशेषः मेधाकुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि न कुलक्षयमाप्नोति सोपि दुर्गतिमाप्नुयात् गृहस्तं
प्राप्नुयाद्वाधिदुःखमनवरतं वसेत् तस्यापि तस्य वंशस्य सद्गतिमिच्छन्स्वहीयसीम् विधानं च विधायाशु श्रौर्ध्वदैहि
कमाचरेत् मृतस्य म्रियमाणस्य षडब्दव्रतमादिशेत् त्रिंशत्प्रोब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान् दण्डमाच
कर्णमाचाद्यात्कृष्णाजिनानि च पादुकाछत्रमालानि गोपीचन्दनमेव च मणिप्रवालमालाश्च ब्रह्मसूत्राणि
चार्पयेत् मंत्रैस्तल्लिङ्गकैश्चैव ब्रह्मसमायुज्यसिद्धये स्वभावेन भवेन्नाशः मायागृहस्थास्साधवः शुभाः एवं कृते विधाने
तु विघ्नस्तस्य न जायते इति स्नातकमरणे तु स्नातको ब्रह्मचारी चेन्निधनं प्राप्नुयाद्यदि संयोज्य चार्धविधिना सं
प्राप्नोति परस्थानमिति कुष्ठिमरणे यमः मृतस्य कुष्ठिनो देहं निखनेत्प्रोष्ठभूमिषु वासरत्रितयं पश्चादुद्धृत्य
मन्त्रतन्दहेत् नगे गाङ्गे वने कार्यं निक्षेपविधिरुच्यते षडब्दव्रतपूर्णेन विधिनान्त्यं कर्म तु चरेत् ततोस्थिसंचय

न्नस्य गंगायां प्रक्षिपेत्सुधीः मासि मासि ततः कुर्य्यान्मासश्राद्धानि पार्वणानु संकल्पविधिना केचिन्नेच्छन्ति मनीषिण
इति पर्युषितशाट्यायनवचः दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् न तस्य पर्युषितमित्याङ्गर्दर्शनेनास्य कारा
णिः पंचगव्येन संस्नाप्य प्राजापत्यं नु पंचरेत् प्रेतधनहारिणः प्रेतक्रियाऽकरणे शंखः प्रेतसम्प्रेन कार्याणि अग्रहे
त्वा धनहारकः वर्णानां यद्वधं प्रोक्तं तद्व्रतम्प्रयतश्चरेत् अयमर्थः नैनिकर्तव्यता मनुः न विप्रं स्वेषु तिष्ठत्सु मृतं
शूद्रेण हारयेत् अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता निर्हरणाशौचमाह मनुः असपिण्डं द्विजम्प्रेत
विप्रो निर्हृत्य बन्धुवत् विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् यद्यन्नमत्ति तेषान्तु दशाहेनैव शुध्यति अ
नदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् न गृहवासिनस्तदन्नमखादतो निर्हरणवतस्त्र्यहम् तद्गृहवासिनस्तदन्ना
शिनोऽपि नस्य दशाहम् अतद्गृहवासिनोऽतदन्नभोजिन एकतस्याहारात्रमित्याशयः बन्धुवद्विनेनधनयसं
पाधिना सवर्णे शवनिर्हरणे दशाहाशौचमिति निबन्धकृतः ग्रामान्तरवासिनो निर्हरणवतस्सजातिः प्रेतस्य
शिनो ग्रामान्तरप्रवेशे पुरा नक्षत्रदर्शनाद् ग्रहीचेत्रिराद्दिमस्मेतेपारस्कृते अन्यवर्णनिर्हरणन्तु न तदुक्ताशौचम् ग

यावगौतमः अवरश्चेद्वर्णःपूर्ववर्णमुपस्पृशेत्पूर्वोवावरंतत्रशवोक्तमाशौचमिति उपस्पृशेन्निर्हरेत् अनाथनिर्ह-
रणेपराशरः अनाथंब्राह्मणंप्रेतंयेवहन्तिद्विजातयः पदेपदेयज्ञफलमानुपूर्व्याल्लभन्तिते नतेषामशुभंकिं-
चित्पापंवाशुभकर्मणाम् जलावगाहनात्तेषांसद्यःशौचंविधीयते समासिनांस्त्रेनाषाशौचंनास्तीतिस्मृत्यर्थसारे
तथाब्रह्मचारिसमासिनामप्याशौचंनास्तीति कौर्मेपि नैष्ठिकानांवनस्थानांयतीनांब्रह्मचारिणाम् नाशौचं
कीर्त्तितंसद्भिःपतितेचतथामृते इति ब्रह्मचारिविषयेमार्गे आचार्य्यपि त्रुपाध्यायान्निर्हृत्यापिव्रतीव्रती
संकरान्नंचनाश्नीयान्नचतैःसहसंविशेत् कटञ्चाशौचविस्वापाघ्र्थस्तद्दन्नमाशौच्यन्तमर्थाद्दिनद्वयमनिर्हरणव्रतभ-
ङ्गः हीनानुगमनेत्वाशौचमाहयाज्ञवल्क्यः ब्राह्मणेनानुगन्तव्योनशूद्रोनद्विजःक्वचित् अनुगम्याम्भसिस्नात्वा
त्वास्पृष्ट्वाग्निंघृतभुक्शुचिः अद्विजोविप्रभिन्नः स्वाम्यवहितनहीनवर्णोनुयानेतुब्राह्मणेऽवशिष्टोक्तमहोरा-
त्रम् एकान्तरानुव्रजनेपक्षिणीद्विवसाद्भयपक्षविवयस्याराजस्यारात्रिःपक्षिणी अन्त्येलेपराशरः प्रेतीभू-
तन्तुयःशूद्रंब्राह्मणोज्ञानदुर्बलः अनुगच्छन्नीयमानंत्रिरात्रेणशुध्यति त्रिरात्रेतुनतःचीर्णेनदींगत्वासमुद्र-

गौं प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति योगी सदग्ध उपेतश्चेदाहिताग्न्याहृतार्थं वचन उपेत उपनीतः आहि
ताग्न्यादृता आहिताग्निर्दाहसंस्कारस्तु लौकिकाग्निना अग्निविशेषनिषेधति देवलः श्रौतेनाग्निरसौ आग्निसंस्का
काग्निस्तथैव च अंगमात्रं पुष्पिताग्निस्तु नाशिष्टं ग्रहणाद्विना इति यमः यस्यानुपनीतस्य शोऽग्निं तृणकाष्ठहवींषि च
मतत्वे हि सदा तु समवाधमेर्णं लिप्यते अनाहिताग्नेर्गृह्याग्निना आहिताग्नेस्तु श्रौताग्निभिरिति तत्रापि स्व
गृह्योक्तविधिनैव कात्यायनः आज्यं तिर्जुहोति पुत्रो भ्राता पौत्रो वा ब्राह्मणो वा त्वमधिजातोसि त्वदयं जायतां पुनः अ
सौ स्वर्गाय लोकाय स्वाहेति असाविमन्त्रप्रेतनामग्रहणमात्रं न्यवहरेत् प्रचेताः स्नात्वा प्रेतस्य पुत्राद्यैर्वेद्याघैः पूज
ननतनुः नमस्कृत्य हन्त्वेवाकिं विहृय परिसंजनं किं विहृयं शवं वृश्चकं दश्याद्भिकं यम शा न श्रुद्धि पुरे इति मितास्य एष
मु स्मृत्यन्तरे रात्रौ वा रात्रिशेषे वाप्युत्पन्ने तु द्विजातयः दाहं कृत्वा यथान्यायं दद्योपिण्डांनिर्वपेत्पुनः पुराणे
आद्यदिनो दाव यवपिण्डानिर्वपेदिति केचित् रात्रावेवैकोवपयवपिण्डो विषमस्यादीयश्चापर एवं दावितिप
दैस्मृतिसंग्रहेपि रात्रौ दग्ध्वा तु पिण्डान्तं कृत्वावपनवर्जितम् वपनं नेष्यते स्नानाद्वपनादिक्रिया सन्ध्यायां वा

रात्रौ १

वि०म०
१६

तथा रात्रौ दाहश्च तस्मात् दिवा परिज्ञानो दाहस्तन्निषेधनिगमवचनं तु दिने मृतस्य न सन्ध्यायां दाहो दाहादिकं मिति सैव परं राज्ञ
न्तरं यावद्गजला: सप्तमाद्दशमाद्वापि स्नानयोर्भुपयन्त्रम्प: अपन: शोशुचदघमनेन पितृन्दक्षुरवा: सप्तमाद्दश
माद्वादिना दर्शकृत्वा अपन इति मंत्रेण प्रथमतृतीयपंचमसप्तमनवमेषु प्रेतस्य नाम गोत्रे उक्त्वा यं तत्पत्निसुदक
दद्युरिति विज्ञानेश्वर: पुत्रान्त [illegible] स्नानमेवमंत्रोगमिति अपन: शोशुचदघमिति दक्षिणाभिमुखा मज्ज
न्ति प्रेतायोदकं सकृत् प्रसिंचन्त्यञ्जलिनासावेतत्ते उदकमिति पारस्करोक्त: प्रतिदिनमञ्जलिवृद्धिरपि दे
या अपदक्षिणाभिमुखा [illegible] वाससोदक्षुरवा: [illegible] आश्वरा जन्मदेशपो विनिमपवेतसाविशेष उ
क्त: अत्र विप्रस्यांजलिप्रक्षेप: दाविंयेद्वादशवैश्य पंचदश शूद्र त्रिंशादितियमोक्तो विशेषोनुसं
धानप: एतच्चोदकदानं मातापितृमातामहाचार्यादीनां नित्यं भागिनेयादीनामनित्यम् तथा च पार
स्कर: एवं मातामहाचार्यप्रेतानामुदकक्रिया कामोदकं सखिप्रेतास्वस्त्रीयश्वशुरर्त्विजाम् ज्ञाति
त्वेसत्सपिण्डविन्निषेधस्तेनैवोक्त: न ब्रह्मचारिण: कुर्युरुदकं पतितास्तथा पतिताश्च द्विजाति

कर्माधिकारः ब्रह्मचारिणामुदकदानादिनिषेधो मातापित्रादिव्यतिरिक्तविषये इत्युक्तम्प्राक् ॥ अशौचं निय-
मानाह पारस्करः कीतलब्धाशनाभूमौ श्वपेयुस्ते पृथक्पृथक् पिण्डयज्ञावृतादेयं प्रेतायान्नं दिनत्रयम् ॥ ज-
लमेकाहमाकाशेस्थाप्यं क्षीरञ्च मृन्मये ॥ आकाशे शिक्यादौ इत्थं द्वयनिधानसामर्थ्याद्द्वयोश्शरावयोः भेदेन
निधानं प्रेतात्र स्नाहि प्रेतेदं पिबेत्यूह्यमिति विज्ञानेश्वरादयः हरिहरस्तु मृन्मय इति पात्रैकवचनसामर्थ्या-
त्प्रेतात्र स्नाहीति मन्त्रेणैकत्रोभयनिधानं मन्यते गारुडे दुग्धनिधानमप्युक्तम् ॥ अपक्वमृन्मये पात्रे दुग्धं
दद्याद्दिनत्रयमिति मात्स्ये तस्मात्स्वेन सुरप्रेतो द्वादशाहं निनीयते ॥ गृहे पुत्रैः कलत्रैश्च द्वादशाहं सप-
श्यति तस्मान्निधेयमाकाशे दशरात्रं पयस्तथा सर्वतापोपशान्त्यर्थमध्वश्रमविनाशनमिति ॥ विष्णुः
यावन्त्याशौचदिनानि तावत्पिण्डदानमाह ॥ यावदाशौचं तावत्प्रेतायोदकं पिण्डञ्च दद्युरिति ॥ पारस्करः
प्रेतेभ्यस्सर्ववर्णेभ्यः पिण्डान्दद्युर्दशैव तु ॥ मरीचिः प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितमिति ॥ आद्य-
द्यांचरुं कृत्वा स्नातः प्रयतमानसः ॥ दर्भवर्जितमनुपनीतविषयम् ॥ असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृ-

वि०शु०
१७

नानाकृत्येष्विति प्रचेतोवचनात् पाषाणे वा देयाः नग्नोमार्ते पिण्डं पानीयमुपले दद्युरिति शंखोक्तेः श्नानान
पः दिवसे दिवसे दद्याऽपि एण्ड एवं क्रमेण तु सद्यःशौचे प्रदातव्यास्सर्वेऽपि युगपत्तथा त्र्याशौचेतु सत्राहे पिपि
ण्डान्दद्याद्दशैवतु त्रिरात्राशौचे पारस्करः प्रथमे दिवसे देयास्त्रयःऽपिण्डास्समाहिताः द्वितीये चतुरो दद्या
दस्थिसंचयनं तथा त्रींस्तु दद्यात्तृतीये तु वस्त्रादिक्षालनं तत इति शुद्धिकारिकायाम् पक्षिणीरात्रमाशौचे
द्वितीयेऽस्थिसंचयः नवश्राद्धवृषोत्सर्गं चतुर्थेऽह्नि समाचरेत् आशौचे तु यदा सद्यो भवेत्तत्र कथं चन यथा
कालं नवश्राद्धमिति सम्प्रवर्तोऽब्रवीत् वृषोत्सर्गादिकं तत्र कुर्यादेकादशेऽहनीति परिशिष्टे असगोत्रः सगोत्रो
वा यदि स्त्री यदि वा पुमान् प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत् षट्त्रिंशन्मते वचः सगोत्रो वाऽसगोत्रो
वा योऽग्निं दद्यात्सखे नरः सोऽपि कुर्यान्नवश्राद्धं पुष्यन्तु दशमेऽहनीति अत्रापि समानकर्तृत्वमात्रमेव वि
धेयम् दशमेऽहनीति तु मासान्तरपाताशौचविषयं तु वाहः यदि स्याद्यदाशाहेसितानांसामुत्सन्तित्वासत्सोम
मखमध्ये विश्वजितातिरात्रेण यजेत तमत्र प्राप्तविभागे सद्योपलक्षकसोमपरत्वम् तेन सत्रियाहिर्दाद

राम
१७

शावादिभिस्सपुत्रेण त्रिरात्राशौचं वचनान्तु तावतैव पाक्षिण्येकाहादिमानपि त्रिरात्रेणैव असंबंधिद्विजान्यहिताय
हिताय च सपत्न्यशौचे सम्बन्धे त्रिरात्रमिति पैठीनसिना दाहमात्रे संबंधिनस्त्रिरात्रविधानात् दाहवहनयोस्स
हिसन्नविवक्षितमनुवाद्यविशेषणत्वात् यत्तु केचिद्दाहपिण्डदानादिनिमित्तं दशाहाद्याशौचं चर
नितान्निर्मूलम् यत्तु निरन्वयसपिण्डेऽनुमृते सति स्यान्नि न: तदशौचं पुराचीर्णं कुर्यात्तु पिण्डक्रिया
मितिवचनस्तद्दशौचाप्रयोजकत्वात्तावदाशौचमानाभावाद्दाहनिमित्तं त्रिरात्रं कृत्वा दशाहपर्यन्तं क्रियां
कुर्यात् अत एवाचीर्णेति क्वापगतमाशौचं समाप्नुनरकालन्तं क्रियासमाप्तेस्सङ्गच्छते अथवास्ने
हानुबंधेपि दाहनिमित्ताशौचमचीर्णाः कृतैवस्यया धर्मार्थं क्रियां कुर्यादिति तेन स्मरणमुक्तमवर्णदाहे
त्ववरस्त्वेहिमादिगौतमीयं तज्ज्ञातमाशौचम् यद्यपि तत्रोपस्पर्शनेन निर्हरणव्याख्यानेमिताक्षरायाम्
तथापि कैमुतिकन्यायेन दाहेपि तद्भवति आले यो सवर्णन्तु मूल्येन नीत्वा चैव दहेन्नरः आशौचन्तु भवेत्त
सप्रेतज्ञातिसमन्वपेति मनुः आमानां याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनं च त्रिभिः कृच्छ्र

विशुध्यतीति ॥ अहीनयाजकानेष्ट्रियाजकयोरेव तन्मात्रप्रायश्चित्तमिति विज्ञानेश्वरः ॥ मेधातिथिस्तु हीनसविहितं
तेनननत्रैर्द्वप्रायश्चित्तं किन्तु रागधाभ्यां न याजकत्वपरान्नकर्मणस्तु निषिद्धत्वात्तत्साक्षात्कर्त्तुर्दण्डहोम इति युक्तमूच
वचस्स्वरसोप्येवम् ॥ देवलः ॥ ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाः ॥ यदि कुर्याच्चरेत्कृच्छ्रं पुनस्संस्कारमेव च
ति ॥ आदिपदमलङ्कारादेर्याहकं न दाहादेः तच्च प्रायश्चित्तं समगुरुत्वात् ॥ पैठीनसिरपि ब्रह्मचारिणः शवकर्म्मे
णाव्रतान्निवृत्तिरिति ॥ उदकदानमपि निषेधमाह याज्ञवल्क्यः ॥ न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥ ब्रह्मच
र्यान्तरं पूर्वमृतानां सपिण्डानामुदकदानमाशौचं चाह मनुः ॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ॥ स
माप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत् ॥ आदिष्टी ब्रह्मचारीति विज्ञानेश्वरः ॥ केचित्तु प्रक्रान्तप्रायश्चित्त आ
दिष्टीति मन्यन्ते ॥ वस्तुतस्तु आदिष्टमादेशस्सोऽस्यास्तीति आदिष्टीति बन्धसाक्षादेवप्रादिष्टिनापि निस्त्व
हलोभहेतुक्रियायास्सामान्यवचनेनैव निषेधात् ब्रह्मचारिणं प्रति पुनर्निषेधः ॥ धर्म्मार्थमपि योगेश्वरः प्रति
श्रमथावैयर्थ्यात् ॥ मनुः ॥ आचार्य्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ॥ निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥

तिमितास्वरायाम् गुरोऽप्येतत्स्यात् शिष्यस्तु पितृमेधं समाचरेत् प्रेताहारैस्समन्तत्र दशरात्रेण शुध्यतीति प्रेताहारैस्स
ह्न भोजनैः एतद्दशरात्रं तद्दन्नभोजनं एवं तस्याभावे त्रिरात्रं तद्दूषणेन पुनरुपनयनं तु न भवति क्रियायां विहितत्वा
त् आचार्याधितिरिक्तक्रियायां त्वाशौचं पुनरुपनयनं प्रायश्चित्तं च भवति अत एव याज्ञवल्क्यः आचार्यपितृ
पाध्यायान्निर्हृत्यापि व्रती व्रतीति निर्हरणमग्निदानादिक्रियान्तरस्याप्युपलक्षणम् अत एव भविष्यत्पु
राणे व्रतस्थोपि यथा पुत्रः पितुः कुर्यात् क्रियान्नृप तथा मातामहस्यापि दौहित्रः कर्तुमर्हतीति मोधवीयब्राह्मे
आचार्यं चाप्युपाध्यायं गुरुं वापि नरं तु वा मातरं वा स्वयं दग्ध्वा व्रतस्थस्तन्न भोजनम् कृत्वा पतति नो तस्मात्
तान्नं तु भक्षयेत् अन्यत्र भोजनं कुर्यात् न च तैस्सह संवसेत् एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यतीति गु
शब्देनेतराशौचावैलक्षण्यं गम्यते तेन पित्रादिभिन्नक्रियायां दाहवहनेतद्दन्नभोजने वा पूर्णाशौचं प्रायश्चि
त्तं पुनरुपनयनानि भवंति चंद्रिकायां सम्वर्तः पित्रोर्गुरोर्विपन्नौ तु व्रतस्थाचार्य्यपि यस्तु कं सव्रतस्यापि कु
र्वीतश्चाग्निप्रणोदकक्रियाम् तेनाशौचं न कर्तव्यं संध्या चैव न लुप्यते अग्निकार्यं च कर्तव्यमसायंप्रातरव

नित्सयइति इदंचमायुक्ताग्निदानुनिमित्तमहनिषेधार्थंननुदृश्याहादेःप्रशस्तत्वभावात् नानाम्नाचार्यकेभ्यो
नलज्वलनिलद्दाब्रह्मचारीनदोषाशौचइतिविशुद्धघसोदैहिकप्रष्ठलग्नदृष्णहाघाशौचमितिकेषांचिद्
स्वस्वचाभिप्रायनजाने यत्तुप्रकाशप्रजापतिः ब्रह्मचारीयदाकुर्यात्पिण्डनिर्वपणंपितुः तावत्कालमु
शौचंस्यात्पुनःस्नात्वाविशुध्यतीति तत्रतावत्कालप्राप्ताशौचमेकाहमित्यर्थः स्त्रीणांसाहचर्यस्तु व्याघ्रपादे
नमूर्णमाशौचंसंध्यादिकर्मलोपश्चाहुतीयादिदिनेषुकर्मकालएवाशौचंनतुगगनःपूर्वोत्तरकालयोरिति
तुः येन आप्तवाक्यमूलात्मूलान्तरकल्पनापत्तेः प्रत्यहमनेकाशौचापत्तिनाप्यकल्पनागौरवाच्च हारीतः
विहितंहिसपिण्डस्यप्रेतनिर्हरणादिकम् शेषस्यानुसपिण्डस्यनत्वानाग्न्यक्रियांविनेति याज्ञवल्क्यः अ
ब्राह्मणेनानुगन्तव्योनशूद्रोनाद्विजःक्वचित् अनुगम्याम्भसिस्नात्वास्पृष्ट्वाग्निंघृतभुक्शुचिरिति मनुः अ
नुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेववा स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति ज्ञातिःसजातीय
मात्रंनतुसपिण्डः तदनुगमनेदोषाभावात् घृतप्राशनंकृच्छ्रेषुपाठनततत्त्वाभावेनपञ्चात्मकंप्रायश्चि

त्वाग्नेजननिवर्त्तकं स्नानन्तरहीनवर्णमपि एतदनुयानेप्येकाहं भक्तमवसिष्ठः शवानुगमने चैवमिति विप्रस्य वैश्या
नुयाने पक्षिणीति विज्ञानेश्वरादयः पराशरस्तु मृतेनुवैश्यं मज्ञानाद्ब्राह्मणो यानुगच्छति कृत्वाशौचं द्विरात्रं
स्नात्वा प्राणायामान्षडाचरेत् एतद्वक्षत्रियस्य मृतदनुयानेपीति मयहतः तथैवस्याश्लोक्यामपि पराशरः
प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः अनुगच्छेन्नीयमानं सत्रिरात्रेण शुध्यति त्रिरात्रे तु ततश्चीर्णे
नदीं गत्वा समुद्रगाम् प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति ज्ञानदुर्बलः ज्ञानशून्यः एवमज्ञाना
दित्यत्रापि ब्राह्मणे ब्राह्मणस्त्वहवर्णानामनुकरोति कदाचन कामान्मोहाद्भयाल्लोभात्तत्क्षणात्तन्मयो भवेदिति
ब्राह्मणपदमुपलक्षणम् वर्णानामिति सामान्यतोऽनुग्रहणमपि हीनजातिपरमेव तत्रापि स्वेच्छानिष्ठत्वा
त्कामादित्यनुग्रहणाच्चैव धर्मार्थं द्विजस्य द्विजातिक्रियायां न दोष इति गम्यते पुनः पुनः शालिना सक्तुभिर्वापि पृथ्वा
केनाप्यथ निर्वपेत् मृतस्य नियतं देवं स्वस्याह्याहिकम् भविष्यपुराणे गृहद्वारे श्मशाने च तीर्थे देवगृहे तथा
यत्राद्यादीयते पिण्डस्तत्र सर्वं समापयेत् निगमे एकस्तोयाञ्जलिस्त्वेकपात्रमेकं च दीयते द्वितीये

मे २

वि०प्र०
२०

द्वौ तृतीये स्त्रीं श्चतुर्थे चतुरस्तथा पंचमे पंच षष्ठे षट् सप्तमे सप्त एव हि अष्टमे ष्टौ नवमे नवैव दशमे दश एते सुःपं
चपंचाशत्तोयस्यांजलयः क्रमात् तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः पंचभिः पंचभिश्चाति पात्रैरन्नोल्लुभि
स्तथा एकादशैवैन्दिपाणि कर्षयन्ति यास्त्रदर्शनादिति पितामहपुराणे तिलाः क्षीरं तथा तोयं धूपदीपं तथा वलिः
मधुसर्पिस्समायुक्तं पिण्डमाकूर्मूर्तो वितरेदिति तथा अर्घ्यं पुष्पं तथा धूपदीपं तोयं च शीतलं कृष्णानन्तुम
यैःश्चार्द्रवाससोभिः पिण्डमर्चयेदिति स्मृतिसारेऽपि भूमौ पिण्डप्रदानं च कर्षूं कृत्वा विधानतः इति कर्षूस्तु भा
शमात्रदीर्घा चतुरङ्गुलविस्तारा तावद्खाता गर्तस्वरूपा अस्थिसंचयनसम्वर्तः प्रथमे द्वितीये वा सप्तमे
नवमे तथा अस्थिसंचयनं कार्य्यं दिने तद्गोत्रजैः सह ब्रह्मविहितोयं पुक्रम वैष्णवेतु चतुर्थे दिवसेऽस्थिसंच
यनं कुर्यात्तेषां च गङ्गाम्भसि प्रक्षेप इति प्रक्षेपो यथा पट्टवस्त्रकौशेयमाजिनं च नवस्त्रकम्बलशाणपट्टोजनै
रष्टभिरुपर्य्युपरि संवेष्ट्य पंचगव्येन प्रक्षाल्य सास्थिदशलातानि कृत्वा स्थीनि पलाशपत्रपुटे संस्थाप्य पु
नर्मधुघृततिलहेमशकलैः सह मृत्तिकेण निधाय यत्नात् पश्चान्नाभिमात्रे जले स्थित्वा नाम गोत्रं समुच्चार्य एवं कं मृत

राम
२०

त्रा १

आद्यर्द्धकंच प्रक्षिप्य रजतं ब्राह्मणाय दद्यात् एवं गंगायां तत्प्रक्षेपे स्वर्गः प्रयागादौ तु मुक्तिरपीति फलम् । च
पुनर्विषयस्थलः दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च प
पनादिद्वादशमपिण्डदानानन्तरम् समाप्य द्वादशमपिण्डं यथा शास्त्रमुदाहृतमिति ब्रह्मपुराणात् भौमार्कमन्दवारे
मलिम्लुचशुक्रास्तादौ गंगायामस्थिप्रक्षेपं नैव कुर्यादिति त्रिस्थलीसेतौ अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम्
प्रथमेब्दे न कुर्वीत कृते तु पितृसपिण्डने यद्दिने मासि सपिण्डनमिति कविताः अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापर
पाक्षिकम् प्रथमेब्देपि कुर्वीत यदि स्याद्भक्तिमान्सुत इति दर्शश्राद्धं गयाश्राद्धमिति कविताः अत्रपुत्रस्म
वादेश्पसमर्थकम् भक्तिस्तु कर्माजनया भाग्यानुबध्नते अतस्सुतेनाघाव्द्वकार्य्यं न्यायेन स्मृत्यन्तरेपि द्वितीयेह्नि
प्रकर्त्तव्यं क्षौरकर्म प्रयत्नतः तृतीये पञ्चमे वापि सप्तमे वा प्रदानतः इति एकादशाहिकश्राद्धप्रदानात् सर्वाग्निरर्थः
श्रापस्तम्बः अनुभाविनां च परिवापनमिति अनुभाविनः कनिष्ठाः सर्वे सपिण्डाः पुत्राद्यश्चेति मिताक्षरायाम्
अनुपनीतपुत्रपत्न्योर्दाहाधिकारमाह कात्यायनः असंस्कृतेन पत्न्या च दग्धव्यो दानं समन्त्रकम् कर्त्तव्यमितरत्तेन

वि० म०
२१

र्वकारयेदन्नमेवहि कृतचौलस्तृतीयवर्षोत्तरं सर्वमौर्द्ध्वदैहिकं कुर्यात् अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकम् य
वसौकृतचूडस्याद्धाद्विवत्सरात्त्रिवत्सर इति सुमन्तुः अत्र विशेषणद्वयमपि विवक्षितम् विधेयकर्तृगतत्वात
षट्पिण्डान्अपि स्मृत्यन्तरे स्वानेवाडुपयेजीतेवितायांशवहस्तके श्मशानवासिभूतेभ्यः पंचमंशान्तिवेश्म
कम् पष्ठसंचयने प्रोक्तो दशपिण्डा दशाहिकाः आद्यषोडशकंचैव प्रथमं परिकीर्त्तितमिति मातिवेश्म
कोद्वारवेश्मस्थः कर्मप्रदीपेपि उत्क्रान्तौ द्वारदेशे च विश्रान्तौ शवहस्तके तंवेसंचयने वापि षट्सुपिण्डा
नुनिर्वपेदिति तं वृक्षिता कृयामुष्टिरिसमे धर्मपुराणे क्लिन्नोवास्य्धदेहावा स्वापदैर्भक्षितोपिवा
अंगमुमास्यपेतेषां पिण्डदानैर्दशाहिकैः आतिवाहिकदेहस्तु प्रेतपिण्डसमन्वितः नोहमोक्षमवाप्नोति
पिण्डांस्तेनैव सोऽश्नुते आतिवाहिकदेहः प्रेतशरीरम् कृते सपिण्डीकरणे तत्संवत्सरान्तरम् प्रेतदेहस
मुत्सृज्य भोगदेहं प्रपद्यते शिरस्त्वाद्येन पिण्डेन प्रेतस्याक्रियते तथा द्वितीयेन तु कर्णाक्षिनासिकास्तुस
मासतः गलांसभुजवक्षांसि तृतीयेन तथाक्रमात् चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ऊरुजंघे तथा

मासे पंचमेन तु सर्वदा सर्वमासेष्वब्देन सप्तमेन तु नाड्यः दन्ततो मासमष्टमेन चूर्णलं क्षुद्विपर्ययः जायते न न
वमेनाथ दशमेन तथाक्रमादिति गृह्यसंग्रहः अलब्ध्वा तु नवश्राद्धमेतत्तान्न विमुच्यते अर्वाक्कुम्भाद्दशाहस्य
लब्ध्वान्तरानि दुष्कृतानि तु अङ्गिराः प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे न तथा नवमैकादशे चैव नवश्राद्ध
न्तदुच्यते नागरखण्डे त्रीणि संचयने सार्धं तानि वै शृणु सांप्रतम् यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत्
एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ततः संचयनस्थाने तृतीये श्राद्धमुच्यते पंचमे सप्तमे तद्वदष्टमे
नवमे तथा दशमैकादशे चैव नवश्राद्धानि तानि वै इति नवसंख्याकानुक्तानि भविष्यपुराणे नवसप्तवि
शाराशां नवश्राद्धाननुक्रमात् आद्यन्तयोर्द्वयोर्योस्तु षोडशमासं नहर्षयः इति गृह्यपरिशिष्टे अन्नदक
मधुपवर्गंधमाल्यविवर्जितम् नवश्राद्धममन्त्रं च पिण्डोदकविवर्जितम् अन्नदकमर्घ्यरहितम् पिण्डद
कमेवं वनेजनोदकम् शातातपः सूतके मृतके चापि द्वितीयं मृतकं यदि पिण्डदानं प्रकर्त्तव्यं शेषोत्सर्गतः एवं
च श्राद्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत् न चैवाशौचपिण्डास्तु शेषान्दद्याद्यथाविधीति यमस्मृतसन्ते

थि०म०
२२

नहन्यात्सूतकं कर्म द्वादश्यैकादश्याह्निकम् शुद्धो वा यदि वाऽशुद्धः कुर्याद्देवा विचारयन्निति गरुडपुराणम् दशा
हमध्ये दर्शपाते स्वल्पस्मृतेः आशौचमन्तरा दर्शे यदि स्यात्सर्ववर्णिनाम् समाप्ते तेन तच्च सकुर्यादिति गाहगो
नमः भविष्यत्पुराणेपि मध्ये त्वाशौचवतस्त्वत्र यदि दर्शो प्रपद्यते समाप्य चोदकं पिण्डं स्नानमात्रं समाचरेत्
आशौचसमाप्तिपर्यन्तं भवेत् स्नानमाचरेदित्यर्थः पैठीनसिरपि आधानादेव कर्तव्याः मनुः पिण्डं दर्शकृ कि
याः द्विरेन्द्वेन तु कुर्वाणः पुनश्चाप्येवं समश्नुते मातापित्रोर्वियुक्ते तु गालवः पित्रोराशौचमध्ये तु यदि दर्शः
समाप्यते पित्रोस्तु यावदाशौचं दद्यात्पिण्डं जलाञ्जलीन् इति गर्भ हानं दर्शपरमिति पितामहचरणाः
कालादर्श एवम् यत्तु मत्स्यागोतमीयमौरसपुत्रपरं भिन्न नन वैपरीत्यस्यापि संभवेन विनिगमनावि
रहात् यत्तपिसप्तवमाधवानिर्णयामृतकारौ च गालवमात्रपिण्डविषयमाहुः तदपि न मानाभावात् अह
मध्ये दर्शपाते आपदि तदनन्तरं च तदभावे गोतमीयस्या पिण्डविषयतया वैपरीत्यस्यापि सुवचत्वेन विनिगमन
नाविरहनादस्याः मत्स्यपुराणे दशाहानन्तरं पुत्रोत्सर्गस्य पूर्वकम् आरभ्येत शुचिर्भूत्वा याऽडमे

राम
२२

घो १

कादशेहनि वृषोत्सर्गं कुर्यादित्यर्थः वृषोत्सर्गप्रयोगस्तु श्राद्धप्रदीपेऽक्तः स्त्रीविषये पतिपुत्रवतीनारीभर्त्तुरग्रे
मृता यदि वृषोत्सर्गं न कुर्वीत गां तु दद्यात् पयस्विनीमिति विशेषः वृषोत्सर्गादि पूर्वं विष्णुतर्पणमुक्तं गारुडे पू
र्वं तु तर्पणं कार्यं मन्त्रैः पौराणवैदिकैः सर्वौषध्यम्बुगन्धैर्मिश्रैर्विष्णुमुद्दिश्य तर्पयेत् कार्य्यं पुरुषसूक्तेन मन्त्रैर
पि च वैष्णवैः दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन् अनादिनिधनो देवः शंखचक्रगदाधरः अव्य
यः पुण्डरीकाक्षः प्रेतमुक्तिप्रदो भवेत् इति पैठीनसिः एकादशाद्ये श्राद्धे तत्सामान्यमुदाहृतम् चतु
र्णामपि वर्णानां सूतकं तु पृथक् पृथक् लौगाक्षिः आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि कर्त्तुस्तात्का
लिकी शुद्धिरशुद्धः पुनरेव सः आद्यश्राद्धमिति सर्वैकोद्दिष्टप्रकृतिभूतम् याज्ञवल्क्योऽपि मृतेहनि तु कर्
त्तव्यं प्रतिमासन्तु वत्सरम् प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि आद्यमेकादशाहनीत्यनेनाद्यदिनश्राद्ध
योराद्यमासिकाद्यवार्षिकयोरेकादश्याहऽत्कर्षो विधीयते॥ ॥ःॐः॥ ॥अथ मृताग्निहोत्रप्रकारः॥ःॐः॥
कारिकासु मृतनाम्नि होत्रे होतव्यप्राग्दाहान्तेत्र कथ्यते प्राचीनावीतिना सर्वं शेषमेवोदरेत्तर शंसत्याद्
॥

तृतीयः सादनाभावतः कूर्चस्थापनं न भवेदिह मार्गयोर्दक्षिणे चैष्वतृणेष्वंसपरिस्तृतिः पर्युक्षणं वतुसे
चकार्यमन्नाग्रदक्षिणम् नर्याद्दक्षिणतो भस्म निरूह्यास्मिन्वसंधिनीम् नर्यो गार्हपत्यः संधिनी गर्भिणी गोः
वत्सान्तरेण दोग्धी वा दुग्धे भस्मसमिध्मिन्नाब्ध्वाल्मसेकवर्जितम् शुद्धासे येन दासाघ दक्षिण स्त्रुक्स्रुवन्ततः
प्रतापयेपरहितं नृतम पृक्सर्कडुत्तयेत धारयन्त्समिधं तधान पूर्दक्षिणतोनयेत त्रुलीं समिधमाधाय सव्यं जानुं न
पातयेत् अपसव्यं स्त्रुवं कृत्वा सक्तं सर्वं विनिःक्षिपेत् ततः कृष्णाजिनस्थीनि पुरुषाकारवन्न्यसेत् ऊर्णाभिः छा
दयित्वा निघृतेनाभ्युक्ष्य पूर्ववत् पात्राणि योजयित्वा तं देहे चेताग्निभिः सहेत इति स्वमृताग्निहोत्रे स्थानरा
मृतकलेवरागमनात्तैः कृत्वा कलेवरं दग्धव्यमिति केचित् अन्ये तु प्राकृताग्निहोत्रस्थाने मृताग्निहोत्र
मिति वदन्ति दाहयज्ञप्राहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चैव विशेषेणानयः श्रुता स्मर्पित पार्थः
पूर्वं म्रियते तेन स्वत्रेतायां पितृमेधस्य मघत इति स्मृचात आहिताग्न्या म्र दम्पत्योर्यस्याहिताग्निर्म्रियते श्रुतिः
तस्य देहस्य पिण्डेस्तु दग्धव्यस्त्रिभिरग्निभिरिति पश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निना अनाहि

ताप्येदेहस्तु रासोऽग्निना द्विजैरिति ब्रह्मपुराणवचनाद्येनायाएव दाहसाधनतानसंभावस्थ्ययोः ॥ सभा
वस्यावाहितान्येदेहनकर्मणि न प्रयुज्येत विनाप्येश्यान्यागृह्याग्निं द्विशिपंच मकमानतिक्रमोत्सृजनीति
शाटपायस्तवचनात् स्त्रीमरणे छन्दोग परिशिष्टे विशेषः अनयैवावृतानारी दग्धव्यापिव्यवस्थिता अ
ग्निप्रदानमंत्रोऽस्मान प्रयोज्य इति स्थितिः सर्वस्थितासाधीन्याधृतप्रकारः अस्माधीनुकेवलाग्निभिः पा
त्रालानुचितेरुत्तरतसमीपेतरस्यैकदेशेन पृथग्दग्धव्यानि अनितिनिन्दितानुकेवलाग्निभिरपिनदग्धव्ये
तिमहूर्नौ वमनेकभार्यसमेष्टायाजीवतां सहाहिताग्निर्द्वितीयापिस्त्रीगार्हपत्यैकदेशेन त्रिभिर्वाग्निभि
र्दग्धव्या तस्मान्नायैकदेशेन दग्धव्या पूर्वसारणी पत्नीज्येष्ठनरावापि यत्रपार्श्वनिरूपणम् तथा स्त्री
मात्रमविशेषेण दग्धव्या वैवाहिकाग्निभिरित्युभययथावचनसद्भावात् वैवाहिकाग्निभिर्गार्हपत्यैकवचनात्तथा
पासहपुनराधानम् आधानोत्तरकाले पाविवाहिताश्रीसानुवैवाहिकाग्निभिर्नदग्धव्या किन्तु गार्हप
त्यैकदेशेनेतिकेचित् परे तस्मान्नाग्निसत्वेन नदभावे लौकिकेनाऊः विशेषमाहमनः अनाथ

वि०म०
२४

एषोरारूढे समीपेनयन्तिर्यदि प्रेतंस्पृष्ट्वामथितास्मिंजह्यावोपावरोहणम् धृतंवसवास्यशोपान्तंतूष्णींकृत्वाग्नौव
त्रिपाम् उपावरोहजातवेदःइमंप्रेतंस्वर्गायलोकायनयप्रेताऊतीवासजुषस्वस्वाहेस्युपावरोहणमंत्रः अ
ग्निनायोयजमानेमृतौकारिकायांनयोगः अग्निनाशेमृतेनशून्यसादाहितामेस्तस्याचेत नयोल्मुकंमथि
तेननसंस्कुर्यस्तस्माद्भावनः नक्षत्रस्पृष्टकाष्ठेनमथित्वानिर्दहज्ज्वलनम् नष्टेष्वग्निष्वपारण्योर्नाशेस्वामीम्रियेत
तवेत् आहरेदरणिहननमाधानोक्तंवनयथा अथविच्छिन्नाग्नेरन्तस्पृष्टाग्नेस्वाधानमाहमण्डनः विच्छि
न्नमग्निमुत्सृष्टपावकंविधुरानलम् आहिताग्निमृतंदग्धुंचेताग्नुमतान्निसिद्धये भारद्वाजास्यऽग्नाऽ
ग्नेनाधानविधिंष्टथक प्राचीनावीतवाकुर्यादग्न्याधानेनथारणान् नवाग्नीनान्वसंस्कुर्यात्प्रेतंस्तामास
नेक्षिपेत नयोलयेरणीस्याम्पमंथयघसेतिमन्त्रतः यस्मान्नयोग्नुयोजुक्तोमांसकामास्सङ्कल्पयन्तु
तेयजमानोध्यायन्तुनेहोविषुसाहितायस्वर्गलोकमिमंप्रेतंनयन्त्विति मथनमंत्रः तूष्णींमुष्टिंपरस्परमा
सामिंसंस्थानेनवसुर्पिषा शसेकृत्वास्त्रुवातूष्णींगृहीत्वाद्वादशस्त्रुवान् दीक्षणाग्निंसमुद्धृत्यनिर्दहेत्सुवै

पच्छवम् उक्तत्वादग्नेरारणिसञ्जावे एवमरणोरभावेतु उक्ताग्नेर्मन्थनसाध्यत्वस्तु पूर्ववंयदारणी आनीयाग्नेनयो
प्रेतपाणिस्थापायद्दहितलाम अयंतु इतिपुत्रादिस्समारोप्ययजु जेपेन मृतोग्याधानवत्सर्वंदग्धात्तेपु
वद्दहेत् अनाहिताग्नेरप्येवंमृतोग्याधानयथाहिताम् अनाहिताग्नेरपिनिसाग्निकातीयाद्दिपरम् तेषांसा
त्वोधा[illegible]नात् यदिस्मृतेभर्त्तरिभार्याम्रियेततदारणीसंपाद्यमन्त्रवदग्निनिर्मथ्यतेनाग्निनापात्रैर्विना
दाहः एवंभार्यामरणोत्तरकालंमृतस्यपुंसोनिर्मथ्येनैवदाहइतिकात्यायनानुसारिणः॥ ॥ॐ॥ ॥
॥ ॥ॐ॥ ॥अथप्रेतक्रियायांनिषिद्धकालः॥ ॥ॐ॥ ॥तत्रगार्ग्यः प्रेतस्यशवसंस्कारेदिनंतै
र्वविशोधयेत् आशौचमध्येक्रियतेपुनःसंस्कारकर्मचेति शोधनीयन्दिनंतत्रयथासंभवमेवतु आ
शौचविनिवृत्तौचेपुनःसंस्क्रियतेमृतः सुशोध्यैवदिनंग्राह्यमृद्धसंवत्सरादिभिः प्रेतकार्याणिकुर्वीतअष्टत
चोत्तरायणम् कृष्णपक्षस्तुतत्रापिवर्जयेद्दिनक्षयमिति प्रेतश्राद्धप्रकरणेगार्ग्यः नन्दायांभार्गवदिने
चतुर्दश्यांत्रिपुष्करे तत्रश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात् त्रिपुष्करयोगश्चरत्नमालायामुक्तः

थि१

वि०म०
२५

विषमचरणभगणनिर्यस्तिज्ञायते सुरगुरुक्ष्मापुत्राणां कथंचनवासरे मुनिभिरुदितस्तोयं योगस्त्रिपुष्करसंज्ञि
तस्त्रिगुणफलसंद्रष्टं नष्टे हते च मृतेप्यथवा येन क्रिया प्रकृता महाभारते न हावेण न कुर्वन्ति यस्मिन्नजाता
नवेन्नरः नमोषुपरस्याः कार्यं न चात्र यच्च भारत ज्योतिःपराशरः साधारणो ध्रुवो यमे बेनोशमसनेमेन्द्र
आणाम् येन क्रिया कथं त्रित्रिपुष्करयमलधिष्ण्यं साधारणेष्टे त्रिकाविशाखध्रुवाख्ये पुनराद्यं यरोहि
णीसुच उत्तराणि सर्वाणि च यमभरणीमघाच मैत्राणि मृगविधात्रराधारेवत्यः यमलधिष्ण्यं धनिष्ठा वा
स्तुपुराणे चतुर्थे शुभगवनेदास्य च वित्रजयेत येन कृतं सम्यक् तीपाते वैधृते परिवेन तथा करणे विष्टिसं
ज्ञे च शनैश्चरदिनेपि च त्रयोदश्यां विशेषेण जन्मनक्षत्रे च येन तथा जन्मनक्षत्रं यमाघस्यामेकोनविंश
तिनक्षत्राणि कश्यपः भरण्याद्रा मघाश्लेषा मूलं विचरणानि च एतानि किंचि ष्टानि वर्जयेत्तु नि
संभवंति यद्वाषोडशाश्चाष्टौ मे कारणा [illegible] दि ग्रुससकालप्रक्रियन्तेन
हानन्ताधिकं न वर्जनीयमिन्नाहगर्गोमिलः नन्दायां शुक्रवारे च चतुर्दश्यां त्रिजन्मसु एकादश्यां हस्तभूति

राम
२५

नेकोद्दिष्टं निषिध्यत इति प्रेतक्रियायामुपस्थितायां दैवाद्युगादिप्रभृतीनामुपनिपाते दिनशोधनं विनैव तन्त्रे प्रे
तक्रियाकार्या तथा वत्सरान्तरे युगमन्वादिसंक्रान्तिदर्शप्रेतक्रियायदि दैवादापतिता यत्तन्नक्षत्रादिशोध
नम् ॥ ॥ ॥ ॥ इति प्रेतक्रियायां निषिद्धकालाः ॥ ॥ ॥ ॥ अथ प्रोषितमरणे विशेषमाह मदनरत्ने
वृद्धमनुः प्रोषितस्य तथा कालो गतश्चेद्द्वादशाब्दिकः प्राप्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत् भविष्यपु
राणे: पितरि प्रोषिते यस्य न वार्ता नैव चागतिः तस्य पूर्ववयस्कस्य विंशत्संवत्सरोर्द्ध्वतः क्रिया ऊर्द्ध्वं पंचदशा
ब्दात्तु मध्यमे वयसि स्मृता द्वादशाद्वत्सरादूर्द्ध्वमुत्तरे वयसि स्मृता चान्द्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा
सुतैः कुशैः प्रतिकृतिं तस्य दग्ध्वाशौचादिकाः क्रिया इति कार्या इति शेषः कुशैरित्यस्थ्नामुपलक्षण
म् छन्दोगपरिशिष्टे विदेशमरणेऽस्थीनि न्याहृत्याभ्यज्य सर्पिषा दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्व
वत् अस्थ्नामलाभे पर्णानि शकलान्युक्तयावृता दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकमिति अनाहि
ताग्नेस्तु विशेषो ब्राह्मे अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः तदभावे पलाशानां वृन्तैः कार्यः पुमा

वि०म०
२६

नपि शतैस्त्रिभिः षष्ठ्यधिकैश्शरस्तम्बैर्विधानतः वेष्टितव्यस्तथा यत्नात्कृष्णसारस्य चर्मणा ऊर्णासूत्रेण बध्वा तुप
लेपयेदथ यवैस्तथा सर्वं पुनर्जलसंमिश्रं दग्धव्यं च तथाग्निना असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सव्यापसव्यैः एवं प
र्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति पर्णशरं पर्णपलाशस्तम्भशरः पर्णच्छन्नं तन्निर्मितं मानिरूपकमित्यर्थः
इदं च त्रिरात्रं दशाहादिसम्पूर्णाशौचकालानन्तरं कार्यम् दशाहमध्ये तु तच्छेषेणैव आहिताग्नेरतीतसंस्का
रे दाहदिनात्सर्वेषां सपिण्डानां सम्पूर्णमेव अनाहिताग्नेस्त्वतीतसंस्कारे पत्नीपुत्रयोरगृहीताशौचयोः स
म्पूर्णं गृहीताशौचयोः कर्माधिकारिणोस्त्रिरात्रम् तथा च गृह्यपरिशिष्टे अथातीतसंस्कारस्य चेद्दशाह

ना४

स्यान्ते त्वेव सर्वं समापयेद्दह्यमाहिताग्नेर्यः सर्वमाशौचं कुर्यात्कर्म च यथाकालमनेषु पत्नीपुत्रयोः पूर्वमगृही
ताशौचयोः सम्पूर्णं गृहीताशौचयोः कर्माङ्गं त्रिरात्रमिति अतीतसंस्कारात्पूर्वं मरणसन्देहेऽगृहीताशौ
चत्वं मरणनिश्चये गृहीताशौचत्वं वाध्यम् अत्र केचित् पत्नीपुत्रग्रहणं बलाहुष्येनिष्कामनयाद्दाहकर्तुर्मा
त्रविषयत्वेन प्रणीयमानस्यापि त्रिरात्रस्य समानकर्तृत्वाविवक्षया पत्नीपुत्रविषयत्वं कल्पनीयमित्याहुः तन्न

नम
२६
५

गृह्यपरिशिष्टे कर्मांगत्वेनैव त्रिरात्रविधानाद्दाहकर्तुरेव त्रिरात्रं प्रतीयते नैतेन दग्ध्वेति क्त्वाप्रत्ययोक्तसमानकर्तृकत्वविवक्षे
षयुक्ता पत्नीपुत्रग्रहणं तु कर्तृमात्रोपलक्षणम् अत एव विश्वादर्शे मुनिरुक्तं निर्दहने त्वग्निदस्यात् त्रिरात्रमित्युक्तम्
-श्रमयामरणनिश्चये पुत्राभावे हस्तनाशौचाद्यापि पत्न्याः पुनः संस्कारे त्रिरात्रं पौत्रादिर्दाहकर्तुरनाशौचमिति सकले
शिष्टाचारविरुद्धं चापद्येत यत्तु मम त्वेवं प्रतिभाति तो साग्निना गृह्यपरिशिष्टेनाश्वासप्रसे गृहीनाशौचानामगृ
हीनाशौचानां वा पुत्रादीनां सपिण्डानां त्रिरात्रमाशौचमित्युक्तं न त्वेष युक्तम् पितरौ चेत्समेतानां पुत्राणां दशरात्र
विधानात् यद्यपि चेदं पूर्णे शरदाहातिरिक्ते सावकाशं परं शरदाहनिमित्तं च त्रिरात्रं पुत्रातिरिक्तसपिण्डानां
सावकाशमिति न परस्परं बाध्यबाधकभावे विनिगमकमस्ति तथापि त्रिरात्रं समुच्चित्य दशरात्रं कार्यम् समुच्च
यत्तु दशाहेन त्रिरात्रस्य प्रसंगसिद्धिरुक्त एवं च शिष्टाचारोऽप्यनुगुणो भवतीति अगृहीनाशौचाना
सपिण्डानामपि त्रिरात्रम् तथा हारीतः दशान्तरमृतं श्रुत्वा नाशौचं चेत्कथं स्याद्दिनादिनाकालविशेषे
विहितस्य त्रिरात्रादेर्माससंख्याविशेषाज्ञानाद्भावापि प्रथमोपस्थितत्रिरात्रस्यैव कर्तव्यत्वमुचितत्वात् स्वाशौ

वकालोत्तरत्वानिश्चये दशाहान्तर्गतत्वेन विशेषज्ञानानन्तरनिश्चयेन यच्छेषमिसेव दिनविशेषनिश्चये तु शेषम्
पापचाराश्वरेत्यादिशाहरूपान्सर्गस्यैव प्रवृत्तेः गृहीताशौचानां स्नानमाचामिति अमुमेवार्थमापस्तम्बः स्मृतवर्थसार
कारसंजयाह गृहीताशौचेन सपुत्रस्य पत्न्याश्चत्रिरात्रम् पत्नीपुनः संस्कारपत्युश्चैवम् अगृहीताशौचानां स
पिण्डानां त्रिरात्रम् गृहीताशौचानां स्नानमात्रमिति दिक्॥ ॥ ॥ अथ पलाशविधिः॥ ॥
गतवत्सलनरो अस्थीनि चेन्न लभ्यन्ते भाषितस्तान्नि होत्रिणः पलाशपत्रवृन्तानां षष्ट्यधिकशतत्रयम्
कृष्णाजिनेन नराकारं कृत्वा कृष्णाजिनेन तम् ऊर्णासूत्रेण बद्ध्वा यवपिष्टेऽवलेपयेत् निर्दिष्टस्थदेहस्यायं ना
स्नानाहारवलायनः अत्राशेनरहलत्वान्मूर्ध्नि दिग्धसंवेष्य पार्थतत इति मूर्ध्नि दग्ध्वमितयवपिष्टलेपानन्तरं मृद्वालि
प्य दग्धा स्नानास्थानेनादग्धास्मृ रसंविजयादित्यर्थः अत्रान्यपलाशवृन्तविभागः अशीतमर्द्धशिरःस्थाने ग्रीवा
वायां दशयोजयेत् उरसि त्रिंशतं दद्यात् विंशतिं जठरे न्यसेत् बाहुभ्यां तु शतं दद्याद्दशाङ्गुलीभिर्दश तृती
याम नममर्द्धे द्वादशार्द्धे वृषणयोरष्टाद्धं शिश्ने एव च ऊरुभ्यां तु शतं दद्यात् त्रिंशतं जानुजङ्घयोः पादाङ्गुलीषु

दशधा एतत्येतेषु लक्षणमिति तथा नालिकेरं शिरःस्थाने तु बंदधा च तालुके पंचरत्नं मुखे दशधा जिह्वायां कदलीफ-
लम् श्रोत्रेषु नालकं दशधा नालकं घ्राणे एव च घसायां मृत्तिका दशधा ओमूत्रेण तु मूत्रकम् गंधकं धान वा दश्या हरि-
तालं मनःशिला पारदं रेतसः स्थाने पुरीषे पिन्नलं तथा मनःशिला तथा गात्रे तिलकल्कं च संधिषु एवपिष्टं तथा मं-
सि मधु शोणितमेव च केशेषु वज्रयन्त्रं टंकनं त्वचायां तु मृगत्वचम् कर्णयोस्तालपत्रं च स्तनयोः श्वेतगुञ्जिका नाभ्यां
यां शतपत्रं च कमलं नाभिमण्डले वृन्ताकं वृषणे द्वन्द्वे लिंगं सो मृजनं शुभम् घृतन्नाभ्याम्रदयस्यात्कौपीनं वच्च
पुःस्मृतम् मौक्तिकं स्तनयोर्मूर्ध्नि कुंकुमेन विलेपनम् कर्पूरागुरुधूपश्च सुभ्रैर्मा[..]लैः सुगंधिभिः परिधानं पट्ट-
सूत्रं हस्ये रुक्मकं तथा स्वर्णहिरोडोउभौ द्वौ च चक्षुर्भ्यां चक्रपोद्दिका सिन्दूरं नेत्रकोणे तु नाद्यलाघुपहारकैः सर्वो-
पधिषुतं यत्नं कृत्वा पूजां यथोदिताम् सात्विकेनापि विधिना यज्ञपात्रं नमस्कमात् शिरोमेष्ठीः पुनस्तु माद्य मं-
त्रवरुणेन च मनसे पावनं कृत्वा शालग्रामशिलाजलैः विष्णुमुद्दिश्य दातव्या सुशीला गौः पयस्विनी तिला
लोहहिरण्यं च कार्पासं लवणं तथा सप्तधान्यं क्षितिं गौश्च एकैकं पावनं स्मृतम् तिलपात्रं ततो दत्वा पदस्थानं च थै

मे२

यत्र मतो वै नरस्तीरे यासर्वाभरणभूषिता कर्त्तव्यं वैष्णवं श्राद्धं प्रेतमुक्त्यर्थमात्मनि प्रेतमोक्षन्ततः कुर्याद्धरिविष्णुं
प्रकल्प्य च ॐ विष्णुरिति संस्मृत्य प्रेतनेनमृत्तु यत्र स्वग्निदाहन्ततः कुर्यात्स्नानं च दिनत्रयम् इत्थं प्रतिकृतिक
रणानन्तरं पात्रप्रतिपत्तिविषयकात्यायनः केशश्मश्रुलोमनखनिकृन्तनानि निकृत्त्वा विपुरीषं वेच्छनं कृष्णादि
न्निरवाय सर्पिषानस्त्वा विनाविनमादधाति कृष्णाजिनमास्तीर्य्य शाकृशिरसं सप्तसु प्राणायतनेषु सप्त हि
रण्यशलाका न्यास्यति मुखे प्रथमं दक्षिणहस्ते जुहूं सास्य निहितपूर्णां ष्ठं स्याष्ठं चोपभृतं ष्ठं सव्य उरसि ध्रु
वां मुखे अग्निहोत्रहवनीं नासिकयोः स्रुवौ कर्णयोः प्राशित्रहरणे शिरसि चमसं प्रणीताप्रणयनं कपालानि दै
कि पार्श्वयोः शूर्प्पमुदरे पात्रीं ष्ठं समवधानीं दृषदं जघनतो ष्ठं शिश्ने शम्याम् अरणी ऊर्वोरन्तरोलूखलमुस
या चरणेष्वनसश्चैव हरणे मृन्मयाश्मयानामयस्मयानि ग्रासलणयद्घाद्दिति केशश्मश्रुनखलोम
छिन्नानादिकं यवस प्रतिकृतौ नुलोपः सप्तप्राणायतनानि मुखनासाक्षिकर्णा श्राणि श्रोत्रपात्रप्र
तिपत्तिस्तु एवमेवाहिताग्नेस्तु पात्रमासारकम्भवदिति कात्यायनोक्तेः स्यात्तु पात्रप्रतिपत्त्यनन्तरं कर्तव्यास्त्रा

र्णानां भवति पत्नीस्त्वेवं दक्षिणपाणिरसंचयशवं वितो निधाय मुखे हिरण्यं शिरसि चमसं पार्श्वयोः शूर्पे स्फ्यं पाणयोर
रणी उदरायमोक्षणी पात्राणि नामनुक्रमेण रूपेभ्यः चर्मो वल्मीकयोः स्थमृन्मया ईनामं भस्मि ततः शिरः अरण्य
ऽग्निं दत्वा स्रुवेण स्वात्वमिमां ऊर्ध्वं निऊत्वा दक्षिणनासिकायां स्रुवं प्रक्षिपेत् स्फ्यं च दक्षिणहस्ते शेषमा
त्यग्निवदिति मृताहस्नानदीपिकायाम् अत्र यस्य निधनं चा मन्त्रवेद्य ज्ञायते तदूर्ध्वं पंचदशाब्दतः भवति
निनसाचरेदन्त्यं कर्म स एव तदहर्दिवसस्मा सद्विकेक कर्मणीति मृताहस्नाने पैठीनसिः अनग्निमतउ
त्थाने राशौ वा द्विजातिषु दाहादग्निमतो विघाद्विदेशस्थे मृते से ति वृहस्पतिः तत्र यत्र मृता
हश्चेत्प्रमीतेः प्रोषिते सति मासश्चेत्प्रमीत विज्ञानस्तदर्शे सान्मृताहनि यत्कर्तव्यं तदिति शेषः अत्रैव
विषये आह विज्ञ समुत्पन्ने त्वविज्ञाते मृतेहनि एकादश्यां तु कर्तव्यमेतत्पक्षे विशेषतः इति मरीचिवच
नाद्दर्शे वा एकादश्यां वेति विकल्पः पद्मपुराणे तु एकादश्यां ज्ञाने तु तत्र नैकादश्यैवेति विशेषः मृताह
ज्ञाने मासाज्ञाने तु भविष्यपुराणे दिनमेव विजानाति मासं नैव तु यो नरः मार्गशीर्षेऽथवा भाद्रे माघे वाथ

वि॰म॰
२९

समाचरेत् उभयाज्ञानेपिवृहस्पतिः दिनमासौनविज्ञातौमरणस्ययदापुनः प्रस्थानदिनमासौतुयासौ
पूर्वोक्तमाचरेत् तज्ज्ञानेपिभविष्योत्तरे मृतवार्त्तांश्रुतेर्यो सौपूर्वोक्तक्रमेणतिथिति पूर्वोक्तसर्वाज्ञानेप
मासस्वणे मृताहंयोनजानातिमासंवापिकथंचन तेनकार्यममावास्याश्राद्धमाघेथमार्गके इति॥ ॥ः॥
॥ ॥ः॥ ॥अथधनिष्ठादिपंचकमृतौशान्तिः॥ ॥ः॥ ॥आरोक्तंत्वाधनिष्ठादिमेगतन्नक्षत्रपं
चकम् स्वमन्त्रंसदाहंस्यमशुभंसर्वदाभवेत् दाहसंचनकर्त्तव्यो विधायस्मिंर्वजातिषु दोषतेनजलन्तत्र
अशुभंजायतेभृशम् ओतिर्विधिश्वायं कुर्यान्नदाहदृणस्यहमन्तकाशायानंम्हनस्यदहनंगृहगोपनंच
शय्याविनाननिहवासवपंचकेपितद्दहेद्विपरतोवसुदैवतार्द्धादिति अन्नकाशयानंदक्षिणादिग्ग
मनम् वसुदैवंधनिष्ठा अथमहामुक्तगुदाहस्वविधिपूर्वकः शवस्यचसमीपेतुक्षिप्यन्तेपुत्तलास्तु
तः दर्भमयाश्चत्वारः ऋक्षमंत्राभिमन्त्रिताः ततोदाहःप्रकर्त्तव्यस्तैश्चपुत्तलकैःसह दर्भाणांप्रतिमा
कार्या पंचाशत्सूत्रवेष्टिताः यवपिष्ठेनानुलिप्तास्ताभिस्सहशवंदहेत् प्रेतवाहःप्रेतसखःप्रेतपः

धम
२९

नमूलिपः प्रेतहर्पयेन्नमस्तु नामान्येतान्यनुक्रमात् नत्वा घट्टस्य मंत्रैः पुत्त्रलानामभिमंत्रणम् ततो मृतस्य मुखे पंचर-
त्नमथैषः ततः ॐ पुत्त्रलमुखे ब्रह्मणे प्रजापतये इति मंत्रेण माज्याहुतित्रयम् ततः ॐ अग्नये स्वाहा इति ग्रस्य च मंत्रास्तु
ञ्जयात्त्रथमृथोरत्नदेवाः ततोयामिमाखेण उत्तनोहिर्बुध्न्यः कद्रुद्राय पृथ्यागग्निर्नेनु सृतेकान्तेनसापंच-
कुर्याच्छान्तिकमुत्तमम् पंचकेषु मृतो योसौ लभते न गतिं नरः तिलान् गाश्च हिरण्यं च तस्मा उद्दिश्य मृतं तन्दहेत् भो
जनोपानहौ छत्रं हेममुद्रं च वाससी दक्षिणा दीयते विप्रे सर्वपापनकुमोचिनो बालकं स्म यस्य पंचकेषु मृतस्य हि
विधानं यान कुर्वीत विघ्नस्तस्य प्रजायते॥ ॥६॥ ॥ अथ रजस्वलापतिमरणे च ग्रहेण सहगमनार्थं शुद्धिं
प्रतीक्षेत नृणाविपयाऽन्योऽपि पतौ पत्नी दधारित्रियामुस्कायो पुनः प्राणान्परित्यजेत् द्रोणमेक तन्दुलानाम्
वहन्यादिशुद्धये मुशलाघातैः सहस्रकं अवतः यानि मलत् विरजस्कां मन्यमानास्त्वेचितेन दस्तकुषयम ६
लाशौचं प्रकर्तव्यं पंचमृत्तिकया ष्टयुक्त त्रिंशद्विंशतिरष्टौ च गर्भाद्द्यात्वहं क्रमात् विप्राणां वचनाच्छेद्व्यासमा
रोहहुताशनम् नारीणां सरजस्काणामियं शुद्धिरुदाहृतेति एतन्मूलं मृगयम गारुडे गर्भे नष्टे क्रियानास्ति

वि०म०
३०

दुग्धं देयं शिशौ मृते परं च पायसं क्षीरं दद्याद्बालविपत्तितः एकादश्यादशाहे वृषोत्सर्गविधिं विना महादानविधा
नं च कुमारे क्षमसमाचरेत् भूमिनिक्षेपणं बाले त्वा वर्षद्वयमाशिखम् ततः परं खगश्रेष्ठ दाहं कुर्याद्यथाविधि शि
शुरादन्तजननाद्बालस्स्यादाचौलाच्छिखः कथ्यते सर्वथा स्त्रीकुमारो मौञ्जिबन्धनात् व्रतकर्मणि संजाते विपत्तिस्तु य
दा भवेत् सूतकान्ते प्रकर्त्तव्यं वृषोत्सर्जनं बुधैः न चैता दश कर्त्तव्यमुदकं तत्र निश्चयः त्र्यामो जीवं धनाद्वयः पं
च मासाद्द्युर्वे न्मृतः केचिदुत्सर्गमिच्छन्ति नैव तत्रामिए क्रियां ध्रुवम् पंचवर्षाधिके बाले विपत्तिर्यदि जायते वृषो
त्सर्गादिकं कर्म कर्त्तव्यमुदकं ततः अहन्यहनि संप्राप्ते कुर्याच्छ्राद्धानि षोडश पायसेन गुडेनैव पिण्डं दद्याद्यथाक्र
मम् अनावाग गवदेयन्तु ततः पितृगणास्य च स्वाहाकारेणवैकुर्यादेकोद्दिष्टानि षोडश सजुद्भैस्तिलैः शुक्लैः
प्राचीनावीतिनिश्चितम् अपसव्यं च कर्त्तव्यं कृतेयानि परांगतिम् सुखं दुःखं महद्देव्रिन्नदेही सर्वं गतन्तिह परि
त्यजतर त्याने जीर्णां त्वचामिवोरगः अंगुष्ठमात्रः पुरुषो वायुभूतः क्षुधार्दितः तस्माद्दद्यान्नि दानानि मृते चैन
स्मिंस्तु निश्चितम् एतानि तु गरुडवचांसि शिष्टैर्नोद्दीयन्ते ॥ ॥ ॥ ॥ अथ सहगमनविधिः ॥ ॥ ॥

रा०
३

गन्तुमर्हतीनिवचोन्तरान्निषेधोभिन्नचितिपरइति विज्ञानेश्वराद्यायुक्तमुत्पश्यन्ति सार्वजनस्याचारोप्यमुमेवप
समनुगृह्णाति कथंतर्हिदेशान्तरदाहेचितिभेदादस्थिभिःपलाशादिमद्धृनावासहगमनम् अत्र चितिशब्द
सप्तपादित्यास्ववृत्तदृष्टादृष्टकूटवाविवादस्यैकाष्ठदाहेपिसंस्काराभावेनचितिभेदाभावः देशांतरेमृत्वा
दिनादाहेतुविभागायाश्चनाशोहस्तेनभवत्येव सत्रियादिनान्तुनिषेधाभावाद्भवति॥ ॥ ॥ ॥अथसहगम
नप्रयोगः॥ ॥ ॥ ॥मासादिसंकीर्त्यात्मनोभर्त्तुश्चानेकजन्मार्जितपापक्षयपूर्वकस्वरोममितान्दसहस्रा
वधिभर्त्तृसाहित्येनस्वर्गवाससमात्पितृकुलोद्धारकामाभर्त्रनुगमनंकरिष्यइतिसंकल्प्य देवैसंपादितोम
हेपतितेसर्वदेवनम त्वयासहगमिष्यामिभर्त्तातंवाजन्मजन्मनीत्युक्त्वास्नाताकुसुमकुंकुमादिनास्वशरी
रमलंकृत्यपुत्रादिभ्योवंधुभ्यश्चाशिषोदत्वा चितिस्थोभगवानग्निर्विश्वरूपीसनातनः पतिलोकसमा
वाप्तेगृहाणार्घ्यंनमोस्तुतेइति विष्णुरूपिणेऽग्नयेऽर्घ्यन्दत्वा एषअर्घोमयादत्तस्सूर्यसाक्षीत्वहस्पतिः म = एम
साहंकुरुमेदेवगृहाणार्घंनमोस्तुतेइति सूर्यायचार्घंदत्वा त्वंब्रह्मात्वंचवैरुद्रस्त्वंविष्णुस्त्वंप्रजापतिः त्वमि

व्यासः यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः तिष्ठते विवशो दीनो वे
ष्ट्यमानः स्वकर्मभिः व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् तद्वदुद्धृत्य सा नारी तेनैव सह मोदते हारीतः ब्रह्मघ्नो
वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः पुनात्यविधवा नारी तमादाय म्रियेत तु चेति सएव तिस्रः कोट्योऽर्द्धकोटी च
यावंत्यंगरुहाणि वै तावंत्यब्दसहस्राणि स्वर्गलोके महीयते मातृकं पैतृकं वापि यत्र चैव प्रदीयते कुलत्रयं
पुनात्येषा भर्त्तारं यानुगच्छति अधिकारस्तु साध्वीनामदुष्टानां च भारत अद्यप्रभृति या साध्वी पत्युः प्रियपरा
यणा तं हि गच्छति सा तत्र भर्त्रनुमरणे गतेति तथा अपवमन्यथा पूर्वं पतिं दुष्टेन चेतसा वर्त्तते या त्वसन्तं भ
र्त्तृणं भोनकुलतः भर्त्रनुमरणे काले याः कुर्वन्ति यथाविधि कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवन्ति ता
इति इदं तु वचो भारते हि विप्रस्त्रीकेषु न दृश्यते कासांचिदनधिकारोऽपि बृहन्नारदीये वाऽपि यामसौर्वः बाला
पत्याश्च गर्भिण्यो ह्यदृष्टरजसस्तथा नारोहन्ति चितां शुभ्रे सम्मं नहुषीमिति इति ब्राह्मण्या अनुगमनेऽनधि
कारः मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनादिति निषेधादिति कल्पतरौ पृथक्चितिं समारुह्य न विप्रा

न्नोवसवस्याष्टोपरमात्मात्वमेवहि त्वमेवशरणंविष्णोशरणंत्वंपुनर्मम स्वर्गेवानरकेवापियत्रयत्रगमिष्यसि तत्रत्र
मसहंएष्टगमिष्यामिनवाशुभं ब्रह्महत्यादिभिःपापैस्त्वामोक्ष्यामियमालयात् अहंयस्मात्त्वहंविष्णुरहंसर्पमस्यहि
कृपानिः आदित्यचन्द्रावनिलोनलोथुधार्भूमिरापोथअहर्निशश्च एतेचसर्वेममसाक्ष्येनतुष्यन्तुतेदेववराश्चसर्वे
इतिपठित्वा [illegible]हरिद्राकुंकुमाञ्जनकज्जलादियुतानिपञ्चसूर्पाणिसुवासिनीभ्योदद्यात् लक्ष्मीनारायणोदेवोभु
लसत्वगुणाश्रयः गाढंसत्वंचमेदद्याद्दायनैःपरितोषितः सोपस्कराणीसूर्पाणिवायनैःसंयुतानिच लक्ष्मीना
रायणप्रीत्यैसत्वकामाददाम्यहमिति ततोदेहाद्यमेसमीपगत्वापंचरत्नानितिलाञ्जनंचस्वर्णंस्वपल्लवेवध्वा
त्वाफलंस्वमुखेनिक्षिप्त्वा स्वाहांसंश्लेषनिर्विलसर्वगात्रकृताशन सत्वमार्गप्रदानेनतमामापरसुरान्तकमितिअग्नि
समभ्यर्च्यतत्रैवाग्नेनदशाहुतीर्जुहुयात् अग्नयेतेजोधिपतयेस्वाहा कालायधर्माधिपतयेस्वाहा पृथिव्यै
लोकाधिष्ठात्र्यैस्वाहा अद्भ्योरसाधिष्ठात्रीभ्यस्वाहा वायवेबलाधिपतयेस्वाहा आकाशायसर्वाधिपतयेस्वा
हा कालायधर्माधिष्ठात्रेस्वाहा अद्भ्यःसर्वसाक्षिभ्यस्वाहा ब्रह्मणेवेदाधिपतयेस्वाहा रुद्रायश्मशानाधिप

वि० न० ३२

नेयस्वाहा इति ततस्थितां संपूज्य तामारम्भफलपुष्पांजलिं गृहीत्वा त्रिरग्निं प्रदक्षिणीकृत्य प्रार्थयेत् त्वमग्ने सर्वभूता-
नामन्तश्चरसि साक्षिवत् त्वमेव देव जानीषे न विदुर्यानि मानवाः अनुगच्छामि भर्तारं वैधव्यभयपीडिता सत्यमा-
र्गप्रदानेन नय मां भर्तुरन्तिकम् इदं शरीरं सकलं मदीयं दग्धात्कृशानो कुरु दिव्यमाशु तथा च भर्तुः कुरु दिव्यदेहम
तस्य समीपं भगवन्नपापे किं मया न कृतं न साधु भवे घोरे च तेन तद् इदं शरीरमालिंग्य प्रविशामि हुताशनमिति त-
तस्तृणकुटीं प्रविश्य श्वोतं सा त्रैलोक्यकं वाग्निमादाय स्वयमेव कुटीं प्रज्वालयेत् तस्मात्प्राणोत्क्रमणोत्तरं पुत्राद-
रधिकारी हव्योरपि दाहं कुर्यात् इति सहगमनविधिः प्रयोगश्च अथाशौचसन्निपाताशौचनिर्णयः ।। ।।श्रीः।।
तत्र केचित् शावयोर्जन्मसूतोर्जन्मप्रभृति निदानस्य वाशौचप्रयोजकत्वात् स्वरूपतस्तयोः निर्देशं ज्ञानिमरणं श्रु-
त्वा पुत्रस्य जन्म चोत्तलिंगदर्शनात् विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् यच्छेषं दशरात्रस्य तावदेवाशु-
चिर्भवेदिति मानवात् उपपन्नेश्च स्वरूपतो मरणमात्रस्यैवाशौचप्रयोजकत्वे हि तत एवाशौचप्रवृत्तौ विनाप्यत-
ज्ज्ञानं दशाहश्येषपूर्णो वस्तुद्धिः स्यादिति न त्यर्थवचनेन देव च स्यात् मरणज्ञानस्य ज्ञात मरणस्यैवानिमित्तत्वे तत्ज्ञानप्र-

राम ३२

ष्टस्यैवाशौचं प्राप्नोति न ह्यपवादस्य सार्थकमेतद्भवेदिति निर्द्धारितत्वाच्च मिताक्षरायां ॥ अहं तु ब्रूमे आशौचं हि सपिण्डजन्मा
दिकारणकं शुद्धा वा ध्रुवा इत्यादिवचनः प्रतिपादितोऽशुद्ध्याख्यस्सपिण्डगतश्शक्तिरूपः पदार्थस्स च जननाद्यन
न्तरमेव सपिण्डेषूत्पद्यते न स्नानमपेक्षते दृश्यते हि स्यादमाशौचं सपिण्डेषु विधीयते जननेष्वेवमेव स्मान्निर्गुणं स्व
दिमिच्छतामिमस्तनेनेति विशेषसंबंधितेन सूतेर्जन्मन श्च निमित्तत्वमुक्तम् तदनन्तरमेवाशौचं वा स्तैर्विहितास्माभिरप्य
न्तरानपेक्षणात् निबंधकाभावाच्च यत्तु स्नानस्य नैमित्तिकत्वात्स्याप्यवन्नैकनिवर्त्तकविधिनिषेधयोर्व्याप्याशौचनिमित्तक
कटश्याप्यापं च यच्चादि प्रवृत्तिनिवृत्तिपरा मरणं श्रुत्वा पुत्रस्य जन्म चेतादिस्नानादि पुरुषव्यापारसमनन्तरं केना प
त्वात्स्तुतेः अतो मरणादिस्नानं विना प्रवृत्तिनिवृत्तयोगात्कृटश्याप्यासंभावस्नानादि प्रवृत्तिनिवृत्त्योर्निमित्तत्वपाप
न्नमेव स्नानमनपेक्षेणेनाशौचनिमित्तत्वपापवृत्तिनिवृत्तिनिमित्तत्वपापपूर्वं स्नानमपेक्षते अतोऽस्तु विधिनिषेधप्रवृत्तिः
र्शनात् आशौचे तु जन्ममरणयोरेवानः परिपंथि भवन्नैव स्नानस्य तत्प्रवृत्तिसामर्थ्ये तेमानाभावात् अतोऽस्नाने
पि पूर्वं जातेजन्ममरणादावाशौचसंभवत्वात् एतज्ज्ञानान्मात्कस्नानमपेक्षते उत्तरभाविजननमरणं वा न स्वतंत्र

पं०म०
३३

स्नाशौचावधिमप्रयोजकं किन्तु पूर्वप्रवृत्तजननमरणमध्यगताशौचावधिकमेवाशौचं तन्मात्रं प्रयोजकमिति अत्र राजन्ममरणे शे
षाहोभिर्विशुध्यतीति याज्ञवल्क्योक्तेः स्वल्पकालपूर्वाशौचे बहुकालीनोत्तराशौचपाते तदुत्तरशेषेण च शुद्धिः अथ वृद्धि
मरणाशौचं पञ्चमेन समापयेदिति यमोक्तेः अथ वृद्धमहद्दीर्घकालीनम् स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि
न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति उशनावचनाच्च अत एव त्रिरात्रादिमृताशौचमध्ये दशरात्रादि ज
ननाशौचपाते न पूर्वशेषेण शुद्धिः किन्तु सम्पूर्णमेव जननाशौचं कार्यम् एवं बहुकालीनेनापि जन्माशौचेन शे
ण स्वल्पकालीनमपि मृताशौचं नापगच्छति सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् तत्राधिकृत्य मृतकं शौचं
कुर्यान्न सूतकमिति संवर्त्तोक्तेः शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति षट्त्रिंशन्मताच्च मातर्यग्रे प्रमीताया
यामशुद्धौ म्रियते पिता पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति मातरि पूर्वं मृतायां दशाहमध्ये
पितान्म्रियेत न तदा न पूर्वाशौचशेषेण शुद्धिः किन्तु पित्राशौचदिनैरेव पित्राद्याशौचे मातृमृतौ पित्राद्याशौचे सेमा
स पक्षिणीमधिकां कुर्यादित्यर्थः एवमपि त्वतिरिक्ताशौचे पित्रोर्मरणे केतु न्निकमायात्सम्पूर्णमेवाशौचं तत्र

राम
३३

र्दशेषेणशुद्धिः अतएवषडशीतानाम् पूर्वशेषेणयाशुद्धिस्तत्केचित्तुकेपि च सूतिकामग्निर्दहित्वा प्रेतस्य च सुतान
पीति अयं चापवादोनैकाहोरात्रशेषयोस्सन्निपाते प्रवर्त्तते उत्सर्गापवादयोस्समानविषयत्वेनान्तराशौचाहः प
द्गर्भितोत्सर्गस्य प्रवृत्तभावात् किंतु द्वितीयाद्यहोरात्रएव मातृमरणनिमित्तपाक्षिणीतु द्वितीयाद्यहोरात्रेस ह
गमनेपि प्रवर्त्ततएव अनुष्टुप्चैवन्द्वात्स्य लघुहारीतवचनम् यदानारीविशत्यग्निं भर्त्तुश्चाप्रियवाछया तद्या
शौचं विधानं भर्त्तुश्शौचक्रमेणहि षडशीत्यामपि मृते पतिमनुव्रज्य पत्नीवह्निलंगता तन्त्रपाक्षिणीमा
यापितृकास्वशुध्यतीति तत्सर्वनिबंधकारैरलिखनात्तनाकरम् इयं च पाक्षिणीदशमरात्रितदन्तपाम
पर्यन्तं मातृमरणे उर्द्ध्वन्तुत्र्यहसमुच्चितासाम्यन्तथामेतुत्र्यहसमुच्चिता समुच्चयस्तुत्र्यहसाध्यहत्र्यहसंख्या
यापाक्षिण्याः असंगृहीसाद्विरूपएव मातृविषये विशेषशिष्टत्वेपि पाक्षिण्याराशिशेषेऽन्यत्रापि च प्रकृष्टमासा
मान्यरूपस्यापि सत्वात्त्र्यहत्र्यहवाधकत्वम् घहत्र्यहयोरात्रियामशेषयोर्विशेषविहितत्वेपि मातृपितृ
विषयेऽन्यत्रापि च प्रकृष्टमासामान्यरूपस्यापि सत्वात्पाक्षिणीवाधकत्वमितिनैकस्य प्रवृत्तिर्नियमेनेति ए

वि०म०
३४

यत्तत्र पितृमरणेपि त्र्यहमेव सम्पूर्णेन अहर्महाविति अत एव तत्रान्यसमरणे अहर्मशौ मातृमरणोपरि शीतिना
नोचितम् आशौचान्तरात्रेण तन्मन्त्रयामेवाशौचान्तरपाते विशेषमाह शातातपः रात्रिशेषे अहच्छुद्धिर्या
मेशेषे श्रुचिस्त्यजेत् पद्मकेऽपि त्रिरात्रमावनादेशाहत्र्यहमावमाशौच मिताहावाशौच मध्ये के रात्रहःया
स्यारहोरात्र परिभाषणाद्दशौचान्मादिने प्याशौचान्तरपाते अहस्त्र्यहमाऊः तत्र रात्रिशेषे इत्यत्र लक्षणा
यां मानाभावात्. परिभाषणं त्रिरात्रस्य दशाहादिपरम् अत्र प्यादशाहविधिना रात्र्यावाशौचाभावेन पञ्च
याद्यनुष्ठानापत्तौ संध्यापञ्चमहायज्ञान्नेमकं स्मृतिकर्म चैतादि संध्यादि पर्युदासवचमोधाधमसंगात् दश
दशावमाशौच मितादि समानार्थकानो स्परात्रमतः परमितादीनामायशौचदर्शनाच्च तेन परिभाषणमपि
मायमूलकम् रात्रिशेषे अहादिमाहेतु नायाभावान्निर्मूलमेव सात् पद्मपुनः पाते दशाहान्याकृद्धं ल
सहगच्छति दशमेऽह्नि पतेद्यस्मात् तद्विवात्सविशुध्यति प्रभाते तु त्रिरात्रेण दशरात्रे यमे विधिरिति देवल
वचनम् पद्माह दशेषेह्याभ्यां प्रभाते तस्मिन् रिनिशं खलिखितवचनेत दशमेह्नि अहस्त्र्यहशेषवानीतस्वत्ति

राम
३४

व्याख्येयम्॥ ॥ः॥ ॥अथ यदि दशरात्राशौचसन्निपाते पुराघं दशरात्रमानवमाद्दिवसात्तदूर्ध्वं द्विरात्रेणशुध्यापां
त्रिरात्रेणेतिबौधायनवचनं द्वितीयमानवमाद्दिवसादितिव्याख्येयम् पक्षे रात्रिमात्रावशिष्टे इति मिताक्षरायां
यापिलक्षणमन्तरेणासंगच्छत इत्यन्ये धरतुगस्त्वाहाराद्धोरात्रलक्षणेवम्नायसीतिदिक् पक्षरात्रिशेष
यामशेषेवात्र्यहाशौचपातस्तत्रशेषशुद्धिविधिमप्रवृत्तेः तदपवादस्त्र्यहमहाभ्यामेवशुद्धिः पारिशेष्यकाद्दयोस्त
त्रसन्निपातेतुपूर्वशेषेणैवशुद्धिः तथासतिरात्रिशेषइत्यादिद्वयमपिपृथक्ता न्यायेनलाघवात् पक्षेम्
योऽप्रतिप्रसवोभवतस्तथापूर्वविधिस्स्यात् तथाहि पक्षेरात्रिशेषेत्र्यहपातस्तत्रपक्षेऽप्यहयोऽप्रसक्तत्वान्न
योरतिप्रसवोयुक्तएव महाशौचपातेपिशेषाहोरात्रेत्र्यहीतात्र्यहपक्षस्यप्रसक्तत्वान्नचापिप्रसवोयुक्तएव प
यं यामशेषेपियेषांतुयस्माहस्तस्यशर्वरीतिपक्षस्तेषांतदहोरात्रंत्र्यहीतैवमहस्यामेऽर्धहमेवाधिकंमानंत्र्य
हमितिनतत्रप्रमाणंतेतिस्मृतिभिरितिप्रतिप्रसवस्संभवतीति पक्षेपारिशेष्यकाद्दशानांतत्रपातेत्र्यहमहाभ्यां
प्रतिप्रसवविध्यसंभवात्पूर्वाविधिरेवसादिति कश्चित्तु देवलबौधायनादिवचनेभ्याहादि वलाश्रह

अहरहर्दद्याह विषयमलमतीते रात्रिशेषे अहःपाते पूर्वशेषेणैव शुद्धिरित्याह तदनुच्यम् दशमादिदशाब्दानां दाहस्य
हायाशौचसंग्रहायेम सम्पूर्णाशौचपरमहोरात्रोपलक्षणेन तस्यावश्यमंगीकार्यत्वेन लाघवादाशौचान्ताहो
त्रमात्रोपलक्षणत्वानापत्तात्रिरात्रादिशुद्धिरात्रादिपाते पूर्वशेषेणशुद्धिर्नस्यादिति अत्रवदन्ति ग्रहणमहाशौ
चेनदधिकाशौचान्तरपातेन्ततरेणैवशुद्धिर्न पूर्वेणतस्याल्पत्वात् अत्रसर्वत्रापि पूर्वमहन्माशौचशेषपरत्वो
त्तराशौचशुद्धापादकानन्तरस्नानेस्तदस्नानमपि पूर्वशौचशेषेणशुद्धिस्तु स्तनिकामध्ये दृष्टे न तसपिण्डानाम्
सूतिकामग्निं दृष्ट्वा पूर्वशेषेण शुध्यतीति स्मृतेः ॥ ॥ ॥ अथ समानदेशदेशान्तरवाऽऽस्विकान्ता
शौचनिर्णयः ॥ ॥ ॥ तत्राशौचमध्ये जननमरणयोः श्रवणे तच्छेषेणैव शुद्धिः प्रोषिते कालशेषः
स्यादिति याज्ञवल्क्योक्तेः विगतन्तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवे
दिति मनूक्तेश्च दशाहादूर्ध्वं ज्ञाने तु वृद्धवसिष्ठः मासत्रये त्रिरात्रं स्यात्षण्मासात्पक्षिणी भवेत् अहस्तु न
वमाद्र्वागूर्ध्वं स्नानेन शुध्यति देवलः आत्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी भवेत् परमेकाहमावर्षा

दर्शे स्नातो विशुध्यतीति अनयोस्सन्निहितासन्निहितभेदेन व्यवस्था स्नानेनोदकमत्युक्तलक्षणे सर्वेषां वत्सरे पू-
र्णे भवेन्नदत्तोदकमशुचिरिति याज्ञवल्क्योक्तेः मनुमानवे संवत्सरेऽतीते तु स्पृष्ट्वैवापो विशुध्यतीत्येवकारस्य बलान्न
कालान्तरस्नानप्रत्यर्थम् मनुस्मृतावाद्यस्य स्यात्पक्षिणीमिति निर्गतमीयन दशमासत्र्यात्षष्ठात्सर्वाशौचमेयम् पू
र्वस्याहश्चतुर्थेकरात्रमिति वासिष्ठेन दशपञ्चमासत्र्या यावन्नवमम् यदपि निर्दशं ज्ञातिमरणं श्रुत्वा पु
त्रस्य जन्म च सवासा जलमाप्लुत्य शुद्धो भवतीति मानवं तद्दशमास्त्र्येयम् अस्मादेव मानवाज्जन्मना
शौचातिक्रमे पितुः स्नानमात्रं सपिण्डानां नास्त्येव अत एव स्वलः नाशुद्धिः प्रसवाद्यवेष्यतीति श्रुतिरेतेष्विति
समानदेशे स्यादन्तरगमनापवादवीर्यावित्सुः अर्वाक् त्रिपक्षात्त्रिनिशं षण्मासात्तु दिवानिशम् अहस्संवत्सरादर्वाक् देशा
न्तरगते स्नपीति अत्र दिवाशब्देनाहर्द्वयमुच्यते आ त्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्पक्षिणी भवेत् परमेकाह
मा वर्षादूर्ध्वं स्नातो विशुध्यतीति देवलोक्तेः दिनाधवः गानवरणास्तु अहस्संवत्सरादित्यनेन पौनरुक्त्यापत्ता देशा
द्वयमुच्यत इति संवत्सरशब्दस्यापादानसंवत्सरपरत्वेन समानदेशेन नवमादूर्ध्वं स्नानं देशान्तरे संवत्सरादूर्ध्वं स्नानमि-

श्रि० म०
३६

ति नानौचित्सम्मिलाऊः यत्तु व्याघ्रशौचप्रकरणे दिवानिशास्थितस्तानामहोरात्रलक्षणयाऽस्तु तत्तन्निशाशब्द
स्य वर्त्तमानाहोरात्रलक्षकः दिवाशब्दो ऽहर्द्वयलक्षणयाधुनिकी सा इतो दिवाशब्दो यथाश्रुत एव न तु दिवाशब्द
स्यैवाहोरात्रलक्षकत्वेति विनिगमनाविरहस्य शङ्क्यः तथा सन्ध्यागामिवर्त्तमानाहःसंक्रान्ताया निशि पक्षिणीमेवं
रूपायाः पक्षिण्या वाधप्रसङ्गात् यादिति देशान्तरमृतं श्रुत्वा क्लीवे वैखानसे यतौ मृते स्नानेन शुध्यन्ति ग
र्भस्रावे च गोत्रिण इति तथा भृग्वग्निमरणे चैव देशान्तरमृते तथा बाले प्रेते च सद्यः स्याच्छौचं विधीयते
देशान्तरमृतः कश्चित्सगोत्रः श्रूयते यदि न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति पराशरवाक्यानि
तानि समन्तरोर्द्धव्यवतिष्ठन्ते पूर्वोक्तविष्णुवाक्यैकवाक्यत्वात् यत्तु बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थि
ते सद्यः स्नानं जलं मासस्तु न सद्य एव विशुध्यतीति मनुवाक्ये कृतं याज्ञवल्क्याभ्यां श्लोकद्वयं सपिण्डविषयम् श्रान्तिमः
श्लोकस्तु सगोत्रमात्रपर इति देशान्तरस्थत्वेन वा सपिण्डो विशेष्यत इति माधवः इदं च सर्वं मान्तिकान्ताशौ
चं दशाहादिसम्पूर्णाशौचविषयम् उपनीते तद्विषमन्तस्मिन्नेवातिकालजमिति व्याघ्रोक्तेः अत्र यद्यपि

पनीतग्रहणेनानुपनीतपर्युदासेप्याचार्य्यमातुलसोदकादिमरणेप्यतिक्रान्ताशौचं प्रसज्जतएव तथापिचि
रात्रपृष्टिरेषाघाशौचातिक्रमेऽपकर्षसौचित्येनत्रिरात्रादिविधानस्यानौचित्यात् अतिक्रान्तदशाहेत्विनिमु
क्तकेप्रीतिनिष्कः अत्रसर्वत्रमासत्रयेत्रिरात्रंसार्द्धमासाद्यमासस्थाने त्रिंशत्रिण्यात्तेरएव ततान्तरमलमास
पातेनमासत्रययेवगणनेतिस्थेयम् अन्यन्तरस्याऽमरत्वेऽइत्यम् मातृपितृविषयप्रष्ठेनस्तिः पितरौचेत्
मृतौस्यातां दूरस्थोपिहिपुत्रकः श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेत् दशाहमितित्वाशौचोपलक्षण
म् स्मृत्यन्तरे महागुरुनिपातेतुआर्द्रवस्त्रोपवासिना अतीतेब्देपिकर्त्तव्यंप्रेतकर्मयथाविधीति इत्यतो
सवर्णानाममसवर्णोसपत्न्योश्वपरस्परं देशान्तरकालान्तरेचदशाहादिसमामाशौचमेवेति स्मृत्यर्थसारे स
पत्नमातृविषयेऽसः पितृपत्न्यामपुत्रायांमातृवर्जंद्विजोत्तमाः सम्वत्सरेव्यतीतेतुत्रिरात्रमशुचिर्भवेदि
ति देशान्तरंच महानद्यन्तरंयत्रगिरिर्वाव्यवधायकः वाचोयत्रविभिद्यन्तेतद्देशान्तरमुच्यते देशान्तरंव
दन्त्येकेषष्टियोजनमानतः चत्वारिंशद्वदन्त्यन्येत्रिंशदन्येतथैवचेति स्मृतावनेकधोक्तम् अत्रवाग्विभेद

सर्वपक्षेषु समुच्चीयते एतच्चातिक्रान्ताशौचमुपनीतमरणएव नत्वपि वयोवस्थाशौचवत्सर्ववर्णसाधारणम् तथा
च व्याघ्रपादः तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च उपनीते तु विषमं तस्मिन्नेवातिकालजम् अयमर्थः ग
न्मप्रभृत्युपनयनान्तवयसि मृताशौचमाहत्य जननान्तस्य दशाहादि नत्वर्णाद्यावर्णादीनां तुल्यम् एवं दशा
हादिके अतिक्रान्ते तदपि तुल्यम् उपनीतोपरमे तु व्याहृत्या दशाहाद्यत्र्यहादिरूपं विषमाशौचं तस्मिन्नेवोपनीतमर
णएवातिकालजमतिक्रान्ताशौचं भवति न पुनर्वयोवस्थाशौचातिक्रम इति॥ ॥ॐ॥ ॥अथैकाशौचम्॥
॥ ॥ॐ॥ ॥मनुः दशाहं शावमाशौचं सपिण्डेषु विधीयते जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम्
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते एकोदकास्सोदकाः इदं च त्रिरात्रं सम्पूर्णप्रसवे उपनीतमरणे
चेदम् दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके त्रिरात्रेण सकुल्यास्तु स्नाता शुध्यन्ति गोत्रजाः त्रिरात्रे
दशरात्रे वा शावमाशौचमिष्यते इत्यादिवाक्ये दशरात्रतुल्यकक्षतया त्रिरात्रस्योक्तत्वात् तेनासम्पूर्ण
प्रसवे त्वनुपनीतमरणे च सोदकानां स्नानमेव एवमेव मातुलपक्षत्रयादीनां चोपनीतानामेव पक्षिणी

घाशौचम् अनयाऽस्वजननाऽहः पूर्वं सोदकमातुलादेर्मृतौ त्रिरात्रं पक्षिणी वाऽहिताद्यसमाचारे सौ परमतो विवसा
न्. मोदकानामनुः सपिण्डतानुपुरुषसप्तमेविनिवर्त्तते समानोदकभावस्तु जन्मनाम्नोरवेदने अत्रापि विनिवर्त्त
तेऽयमनुषञ्जनीयम् गोत्रजेष्वकरान्नुसारेपि मनुनोक्तत्वात् समा हृईचतुर्दशपुरुषपर्यन्तं सोदकास्तु हृद्वेगेत्र
जाऽस्तु तम् ततोपाध्यायादिमृतावशौचम् अहोरात्रमनुवृत्तौ याज्ञवल्क्यः गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु
च गुरुरुपाध्यायः अन्तेवासी शिष्यः समानग्रामवासि निश्श्रोत्रियेष्वाश्वलायनः एकाहं सब्रह्मचारिणि स
मानग्रामीणे च श्रोत्रियेति आचार्यपरमेतमनुः त्रिरात्रमाऊराशौचमाचार्ये संस्थिते सति तस्य पुत्रे च प
त्नो च दिवारात्रमिति निस्थितिः महेमातामहाचार्यश्रोत्रिये श्वसुरविर्भवेत् पित्रोरुपरमे स्त्रीणामूढानां तु
कथं भवेत् त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः श्वसुरात्मभगिनीमांच मातुलानीं च मातुले पित्रोः स्व
सरितद्वत्पक्षिणीं क्षपयेन्निशाम् तथा मातुले श्वसुरे मित्रे गुरौ गुर्वङ्गनासु च आशौचं पक्षिणीं रात्रिं
मृता मातामही यदि चकाराद्बान्धवेष्वित्यग्रपक्षतः तेचात्मनः पितृष्वसुर्मातुलस्य च पुत्राश्चात्मबान्धवाः

गु:

पि०प्र०
३८

पितुः पितृष्वसुर्मातृष्वसुर्मातुलस्य च पुत्राः पितृबान्धवाः मातुः पितृष्वसुर्मातृष्वसुर्मातुलस्य च पुत्रा मातृबान्धवा इति
त्रिविधाः वृद्धमनुः संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति विदे
शस्थ भगिन्या दौहित्रवृद्धवसिष्ठः भगिन्यां संस्कृतायां वा भ्रातर्यपि च संस्कृते मित्रे जामातरि प्रेते दौहित्रे भगिनीसु
ते शालके तत्सुते चैव सद्यः स्नानेन शुध्यति जामातृश्यालकतत्सुतानां तु सद्यः शुध्यव अभिधानं समानदेशे पि
तथा शिष्यन पक्षिण्याः त्रियकुलपतिग्रामेश्वराणां सन्निहितानां दिवा मृतौ नक्षत्रदर्शनाच्छुद्धिः रात्रौ चेत्सू
र्यदर्शनात् यावद्ग्राममध्ये शवस्तिष्ठति तावद्ग्रामस्याशौचं निर्हृते तु शुद्धिरेव नगरस्य वीथ्यामशौचं नेतरेषाम् अत्रैवं
विषये उच्चावचान्याशौचकल्पादिगुणवद्गुणवतादिनाव्यवस्थाप्याः ते चेह नस्वरध्यायसापेक्षमपसंकोचनं
न्यूनमादिना कलौ प्रतिषिद्धाः कलिवर्ज्यविचारस्य समयमयूखे द्रष्टव्यः ॥ ॥ऽ॥ ॥ अथाशौचापवादः
[illegible] ॥ ॥ऽ॥ ॥ नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते
न इति स्याशौचे सकलकर्माधिकारनिवृत्तौ केचन धर्माः प्रसक्त्यन्ते तेष्वपवादः स्नानं कर्मपरित्यागो रोदा

रा
३

रन्तरसूतके श्रौतकर्मणि तत्कालं स्नानः शुद्धिमवाप्नुयात् श्रौतस्मग्नित्रयसाध्यावश्यकानां निमित्तेनैमित्तिकानाम
ग्निहोत्रदर्शपूर्णमासादीनां पर्युदासो निमित्तानि निवर्त्तन्ते येनानवर्जशालाग्नौ चैकः इति पैठीनसिवचनात् गृह्याग्निसा
ध्यानामथावश्यकानां वैकल्पिकः पर्युदासः शातातपोऽपि सूतकेतु समुत्पन्ने स्मार्त्तकर्म कथं भवेत् पिण्डयज्ञं
चरुं होमं असगोत्रेण कारयेत् चरुः पार्वणस्थालीपाकः श्रवणाकर्माश्वयुज्यादिकर्म होमेनित्यः स्मार्त्तेइध्मागमा
नंस्वयंकार्यम् असमतसगोत्रेण कारयेत् श्रौतेष्वेवमिति मिताक्षरायाम् सर्वकर्मस्वयंकार्यमितितु पक्षः
तत्रापि श्रौतस्मार्त्तहोमः शुष्कान्नफलादिनैव कर्त्तव्यो दुग्धादिनातु सगोत्रेणैव कारयेदिति तथ शनिकेविन् अत्तए
व सूतकेच प्रवासेच अशक्तौ श्राद्धभोजने एवमादिनिमित्तेषु हावयेत्तु हापयेदिति क्रमम् यत्तु सनेभीतियहो
होमस्वाध्यायश्च निवर्त्तन्त इति तत्काम्यहोमपरं वैश्वदेवपरं च तथा शिवविष्ण्वर्चनं दीक्षायां वर्त्तन्ते परियहः
एतत्कर्माण्यकुर्वीत स्नानः शुद्धिमवाप्नुयात् जाबालिः अध्याग्निमानसीसंध्याप्राणायामविवर्जितेति अं
ञ्जलिप्रक्षेपस्तु सावित्रीमुच्चार्य इति पैठीनसिनोक्तम् तथा सूतकमृतकेउभयत्रजलस्नानं रुशाहाहिमुन्न

वि० म०
३८

इतियमोक्तेरसपिण्डैराशौचवान्नं भोक्तव्यम् यथा पारस्करीयमन्त्रं भक्षयन्निति हारीतः आशौचमध्ये पावन्नेषामिति
श्राद्धादिषु यावदन्नं समश्नाति नावदहति मन्त्रविस्मात्ततः आयुर्वित्तवरं दिति ब्रह्माशौचान्नभोजने दोषश्च श्राद्धभो
क्तव्यन्तरस्याशौचवद्दानएव तथा बृहस्पतिः उभाभ्यामपरिज्ञाने सूतके नैव दोषभाक् एकेनापि परिज्ञाने भो
क्तुर्दोषमुपाहरेत् तथा विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके परैरन्नं प्रदातव्यं दातृन्भोक्तृश्च न स्पृशे
त् विवाहादिषु एवं वर्त्तव्यं सङ्कल्पितेनापि न दोषः तथा भुञ्जानेषु तु विप्रेषु अन्तरा मृतसूतके अन्यगेहोदका
चान्ताः भुक्त्वान्नं सर्वे शुध्यन्ति इति मरीचिः लवणं मधु मांसं च पुष्पमूलफलेषु च शाककाष्ठतृणेषु अप्सु द
धिसर्पिःपयस्सु च तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः पण्येषु चैव सर्वेषु नाशौचं मृतसूतके इति प
क्वं भक्ष्यं अपक्वं तण्डुलादि स्वयंग्रहः स्वयमेव स्वाम्यनुज्ञातेन उपादेयादिति अर्थः पक्वापक्वयोर्ग्रहणं स्नेहपक्व
तादृशस्याप्यनुमतस्मात् तथा चाङ्गिराः अन्नं सत्रप्रवृत्तानामाममन्नमगर्हितम् भुक्त्वा पक्वान्नमेतेषां त्रिरात्रन्तु
पयः पिबेत् अन्नपक्वं यस्त्वोदनपरः तथा व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे आरब्धे सूतकं न स्यादना

स्येनुसूतकम् सूतकमितिमृतकस्याप्युपलक्षणं प्रारंभश्च प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नान्दीमुखं
विवाहादौश्राद्धेपाकपरिक्रियेति स्मृत्यन्तरेपि एकविंशत्यहर्यज्ञेविवाहेदशवासराः त्र्यहानिचौलोपनये
श्राद्धेपाकपरिक्रियेति आशौचसंभावनायामेकविंशत्यादिदिनमध्येयथानेनानेकदिनव्यवहितमपि
नान्दीश्राद्धंकार्यमितिप्रयोगरत्नेपितामहचरणाः प्रचेताः कारवःशिल्पिनोवैद्यादासीदासास्तथैवच
राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताः सद्यःशौचंशिल्पिवैद्यानन्यसाध्यकर्मण्येवनतुपंचयज्ञादा
विति मिताक्षरायाम् तथासूतकादौनित्यस्नानशौचमन्त्रबलिहानमाणाऊनिपात्रकरणादयोभुजिनिय
मान्नस्पृष्टपूर्वस्पर्शनस्नानादिकंचेतिसर्वकर्त्तव्यमेवेतिस्मृत्यर्थसारे नित्यस्नानसहितमर्गनपर्णमेवकार्यम्
स्पृष्टस्पर्शनवान्तेश्मश्रुपानेक्षुरभंगे स्नानंनैमित्तिकंकार्यंदैवपित्र्यविवर्जितम् उष्णैररुद्धैःस्नायान्न

वि० म०
४०

र्याद्दृष्युपीडनमिति नैमित्तिकस्नानमेवतर्पणाद्यंगं पर्युदासात् पितृमरणोत्तरं प्रथमा ब्दे विशेषमाह देवलः
स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणम् प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने स्नानं समावर्त्तनं काम्य
स्नानं वा महादानमाहचर्येण विशिष्यार्थमायदर्शनादिनिमापान् स्वाध्यायः काम्यब्रह्मयज्ञाध्ययनम् अ
ग्नितर्पणं काम्यो होमः देवलः प्रमीतो पितरौ यस्य देहस्तस्याशुचिर्भवेत् न दैवं नापि पित्र्यं वा यावत्पूर्णो
न वत्सरः इति दैवं स्नानादि पित्र्यं गयापरपक्षनिमित्तमेकोद्दिष्टं पार्वणं च पित्र्यतिरिक्तस्य अतएव श्रे
स्यबोधे गयाश्राद्धं श्राद्धं चापरपाक्षिकम् प्रथमेऽब्दे न कुर्वीत कृतेऽपि तु सपिण्डने तथा दर्शश्राद्धगया
श्राद्धं श्राद्धं चापरपाक्षिकम् प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्भक्तिमान् सुतः इति भक्तिमान्भक्तस्तारतम्यज्ञानवान् त
त्कृतानां निष्क्रयोऽहि हितिकेचित् तन्मूलं चिन्त्यम् सुत इत्येव निमित्तसमर्पकम् भक्तिमत्त्वं तु कर्मांगत्वेन मात्र

तास्त्वघनइतितद्युक्तम् तथा सर्वेषां प्रेतकार्याणि महागुरुनिपातने कुर्यात्संवत्सरात्सर्वाकिं श्राद्धमेकं तु
वर्जयेत् भृगुः माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा एषां मृतौ चरेच्छ्राद्धमनन्तरमृतं पुनः पितुः तथा
माता चैव सुतो भ्राता पत्नी चैव विपद्यते तत्र श्राद्धानि कुर्वीत न कुर्याज्जनके मृते मातागोत्रीणजननीतन्
यमीतोऽपि नराविति स्वबलीयेन दैवपित्र्ययोर्निषेधात् एतत्सर्णसांवत्सरिकपरमिति केचित् तत्रापि
मूलं मृग्यम् अत्र पितरि मृते ऽसपिण्डीयश्राद्धं न कुर्यादिति निषिध्यते अन्यमृतौ कुर्यादिति तु निष्पत्तिरह
म् सामान्यवाक्यपात्रमेवानूघन इति दिक् ॥ ॥ ॥ ॥ इति श्रीसेंगरवंशावतंसमहाराजाधिराजश्री
भगवन्तदेवादिष्टमीमांसकशंकरभट्टात्मजभट्टनीलकण्ठकृते भास्कराख्ये निबन्धे विशुद्धिमयूखो नाम
शाद्शोमयूखः ॥ ॥ ॥ ॥ ज्येष्ठमासि शुक्लपक्षेऽष्टम्यां रविवासरे लिखितं पुस्तकमिदम् स

इतिविष्णुडिमरूरवः पत्रसंख्या ४१